
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

हस्तलिखित संग्रह


दाखल क्र. M 457 विषय स्तोत्र

नांव- सप्तशती

लेखक/लिपीकार ....

पृष्ठ 35

काळ शके १६७६ पूर्ण/अपूर्ण ....


सप्तशत्याः आरंभ पत्रं॥ श्री

स॰ १
१

॥श्रीगणेशायनमः॥ श्रीचंडिकायै॥ ॥मार्कंडेय
उवाच॥ ॥यद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणां॥ यन्न
कस्यचिदाख्याततन्मे॥ ब्रूहिपितामह ॥१॥
ब्रह्मोवाच॥ अस्ति गुह्यतमंतमेंविप्र
सर्वभूतोपकारकं॥ देव्यास्तुकवचंपुण्यं
तच्छृणुष्वमहामुने ॥२॥ प्रथमंशैलपुत्रीचद्वि
तीयंब्रह्मचारिणी॥ तृतीयंचंद्रघंटेतिकूष्मांडेतिच
तुर्थकं॥३॥ पंचमंस्कंदमातेतिषष्ठंकात्यायनीतथा॥ स

राम॰
१

प्तमंकालरात्रीचमहागौरीतिचाष्टमं॥४॥ नवमंसिद्धि
दाप्रोक्तानवदुर्गाःप्रकीर्तिताः॥५॥ उक्तान्येतानिनामानि
ब्रह्मणैवमहात्मना॥६॥ अग्निनादह्यमानस्तुशत्रु
मध्येगतारणे॥ विषमेदुर्गमेचैवभयार्ताःशरणंग
ताः॥७॥ नतेषांजायतेकिंचिदशुभंरणसंकटे॥ नाप
दंतस्यपश्यामिशोकदुःखभयंनहि॥८॥ यैस्तुभक्त्यास्मृ
तास्तेनंतेषांसिद्धिःप्रजायते॥ प्रेतसंस्थातुचामुं
डावाराहीमहिषासना॥९॥ ऐंद्रीगजसमारूढावैष्ण

स०१
२

वीगरुडासना॥ माहेश्वरीवृषारूढा कौमारीशिखिवा
हना॥ ९ ॥ ब्राह्मीहंससमारूढासर्वाभरणभूषिता॥
लक्ष्मीः पद्मासनादेवी पद्महस्ताहरिप्रिया॥ १० ॥ श्वे
तरूपधरादेवीईश्वरीवृषवाहना॥ इत्येतामातरःस
र्वाःसर्वयोगसमन्विताः॥ ११ ॥ नानाभरणशोभाढ्या राम
नानारत्नोपशोभिताः॥ श्रेष्ठैश्चमौक्तिकैःसर्वादिव्य २
हारप्रलंबिभिः॥ १२ ॥ इंद्रनीलैर्महानीलैः पद्मरागैःसु

शोभनैः॥ दृश्यंतेरथमारूढादेव्यःक्रोधसमाकुलाः
१३ शंखंचक्रंगदांशक्तिंहलंचमुसलायुधं॥ खेटकंतो
मरंचैवपरशुंपाशमेवच १४ कुंतायुधंत्रिशूलंच
शार्ङ्गमायुधमुत्तमं॥ दैत्यानांदेहनाशायभक्तानाम
भयायच १५ धारयंत्यायुधानीत्थंदेवानांचहिता
यवै॥ नमस्तेस्तुमहारौद्रेमहाघोरपराक्रमे १६ म
हाबलेमहोत्साहेमहाभयविनाशिनी॥ त्राहिमांदे

स० १
२

विदुः प्रेसेशत्रूणां भयवर्द्धिनी ॥ ७ प्राच्यां रक्षतु मामैंद्री
आग्नेयामग्निदेवता ॥ दक्षिणे रक्षवाराही नैर्ऋत्यां
खड्गधारिणी ॥ ८ ॥ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृग
वाहिनी ॥ उदीच्यां दिशि कौबेरी ईशान्यां शूलधारिणी
॥ ९ ॥ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं
दशदिशो रक्षेच्चामुंडा शववाहना ॥ १० ॥ जया मे चा
ग्रतः स्थातु विजया स्थातु पृष्ठतः ॥ अजिता वामपार्श्वे

रा॰म॰
२

च दक्षिणे चापराजिता ॥ ११ ॥ शिखां मे द्योतिनी रक्षेदुमा
मूर्ध्नि व्यवस्थिता ॥ मालाधरी ललाटे च भ्रुवौ रक्षेद्यश
स्विनी ॥ १२ त्रिनेत्रा च भ्रुवोर्मध्ये यमघंटा च नासिके ॥
शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ १३ ॥ क
पोलौ कालिका रक्षेत्कर्णमूले च शांकरी ॥ नासिकायां
सुगंधा च उत्तरोष्ठे च चर्चिका ॥ १४ ॥ अधरे चामृतकला
जिह्वायां च सरस्वती ॥ दंतान्रक्षतु कौमारी कंठमध्ये तु

स०
४

चंडिका ॥२५॥ घंटिकां चित्रघंटा च महामाया च तालु
के ॥ कामाक्षा चुबुकं रक्षेद्वाचं वै सर्वमंगला ॥२६॥
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ नीलग्रीवा ब
हिः कंठे नलिकां नलकूबरी ॥२७॥ खड्गधारिण्युभौ
स्कंधौ बाहू मे वज्रधारिणी ॥ हस्तयोर्दंडिनी रक्षेदं राम०
बिका चांगुलीस्तथा ॥२८॥ नखांछूलेश्वरी रक्षेत्कुक्षौ ४
रक्षेत्कुलेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनः शोकविना

शिनी ॥२९॥ हृदये ललिता देवी उदरे शूलधारिणी ॥ ना
भौ च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥३०॥ कट्यां भग
वती रक्षेज्जानुनी विंध्यवासिनी ॥ भूतनायका मेढ्रं च
उरू मे मेघवाहना ॥३१॥ जंघे महाबला प्रोक्ता सर्व
कामप्रदायिनी ॥ गुल्फयोर्नारसिंही च पादपृष्ठेमितौ
जसी ॥३२॥ पादांगुलीः श्रीधरी च पादाधस्तलवासिनी ॥
दंष्ट्रा करालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी ॥३३॥ रो

मकूपे पु कौमारी त्वचं वागीश्वरी तथा॥ रक्तमज्जावसा
मांसान्यस्थिमेदांसि पार्वती॥३४॥ आंत्राणि कालरा
त्रिश्च पित्तं च मुकुटेश्वरी॥ पद्मावती पद्मकोशे कफे
चूडामणिस्तथा॥३५॥ ज्वालामुखी नखज्वालाम
भेद्याः सर्वसंधिषु॥ शुक्रं ब्रह्माणिमे रक्षेच्छायां छत्रे
श्वरी तथा॥३६॥ अहंकारं मनो बुद्धिं रक्षने धर्मधारिणी
॥प्राणापानौ तथा व्यानमुदानं च समानकं॥३७॥ वज्र

हस्ता च मे रक्षेत्प्राणं कल्याणशोभना॥ रसे रूपे च गंधे च
शब्दे स्पर्शे च योगिनी॥३८॥ सत्वं रजस्तमश्चैव रक्षे
न्नारायणी तथा॥ आयुर्मे रक्षवाराही धर्मं रक्षतु वैष्ण
वी॥३९॥ यशः कीर्त्तिं च लक्ष्मीं च सदा रक्षंतु मातरः॥ गो
त्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके॥४०॥ पुत्रान्र
क्षेन्महालक्ष्मीर्भार्यां रक्षेतु भैरवी॥ धनेश्वरी धनं रक्षे
त्कौमारी क[illegible]कांस्तथा॥४१॥ मार्गं क्षेमकरी रक्षेद्विजया

स॰ती
६

सर्वतः स्थिता ॥ सर्वरक्षाकरं पुण्यं कवचं सर्वदा जपेत्
॥ ४२ ॥ इदं रहस्यं विप्रर्षे भक्त्या तव मयोदितं ॥ रक्षाही
नं तु यत्स्थानं वर्जितं कवचेन तु ॥ ४३ ॥ तत्सर्वं रक्ष मे
देवी जयंती पापनाशिनी ॥ पदमेकं न गच्छेत्तु यदीच्छेच्छु
भमात्मनः ॥ ४४ ॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छ
ति ॥ तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः ॥ ४५ ॥
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥ परमैश्वर्य

राम॰
६

मतुल्यं प्राप्नोति भूतले पुमान् ॥ ४६ ॥ निर्भयो जायते म
र्त्यः संग्रामेष्वपराजितः ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेना
वृतः पुमान् ॥ ४७ ॥ इदं तु देव्याः कवचं देवानामपि दुर्ल
भं ॥ यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ॥ ४८ ॥
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ॥ जीवेद्वर्षश
तं साग्रमपमृत्युविवर्जितः ॥ ४९ ॥ नश्यंति व्याधयः सर्वे
लूताविस्फोटकादयः ॥ स्थावरं जंगमं चापि कृत्रिमं चापि

स॰ती
६

यद्विषं॥५०॥अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले॥
भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः॥५१॥सह
जा कुलजा लोमा डाकिनी शाकिनी तथा॥अंतरिक्षचरा
घोरा डाकिन्यश्च महाबलाः॥५२॥ग्रहभूतपिशाचाश्च राम॰
यक्षगंधर्वराक्षसाः॥ब्रह्मराक्षसवेतालाः कूष्मांडा ७
भैरवादयः॥५३॥नश्यंति दर्शनात्तस्य कवचे हृदि सं
स्थिते॥मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परं॥५४॥

यशसा वर्द्धते सोपि कीर्तिर्भूमंडले॥तस्माज्जपे
सदा नित्यं कवचं कामदं मुने॥५५॥जपेत्सप्तशती
चंडीं कृत्वा तु कवचं पुरा॥निर्विघ्नेन भवेत्सिद्धिश्चंडी
जपसमुद्भवा॥५६॥यावद्भूमंडलं धत्ते सशैलवन
काननं॥तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रिकी॥
५७॥देहांते परमं स्थानं यत्सुरैरपि दुर्लभं॥प्राप्नोति
पुरुषो नित्यं महादेव्याः प्रसादतः॥५८॥ ॥इति हरिहर

०ती
८

ब्रह्मणाविरचितंदेव्याः कवचंसंपूर्णं॥ ॥ॐ नमश्चंडि
कायै॥ ॥जयंतीमंगलाकालीभद्रकालीकपालिनी॥
दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते॥१॥म
धुकैटभानिर्नाशीविधात्रीवरदेनमः॥रूपंदेहिजयं
देहियशोदेहिद्विषोजहि॥२॥महिषासुरविद्राविवि
धात्रवरदेनमः॥रूपं॥३॥रक्तबीजवधेदेविचं
डमुंडविनाशिनि॥रूपं॥४॥शुंभस्यैवनिशुंभस्य

रामः
८

धूम्राक्षस्यचमर्द्दिनि॥रूपं॥५॥वंदितांघ्रियुगेदेवि
देविसौभाग्यदायिनी॥रूपं॥६॥अचिंत्यरूपचरिते
सर्वशत्रुविनाशिनि॥रूपं॥७॥नतेभ्यः सर्वदाभक्त्या
चंडिकेदुरितापहे॥रूपं॥८॥स्तुवद्भ्योभक्तिपूर्वंत्वां
चंडिकेव्याधिनाशिनि॥रूपं॥९॥चंडिकेसततंयेत्वाम
र्चयंतीहभक्तितः॥रूपं॥१०॥देहिसौभाग्यमारोग्यं
देहिदेविपरंसुखं॥रूपं॥११॥विधेहिद्विषतांनाशं

स०ती
९

विधेहिबलमुच्चकैः॥रूपं०॥१२॥विधेहिदेविकल्याणं
विधेहिविपुलांश्रियं॥रूपं०॥१३॥सुरासुरशिरोरत्न
निघृष्टचरणेंबिके॥रूपं०॥१४॥प्रचंडदैत्यदर्पघ्नेचं
डिकेप्रणतायमे॥रूपं०॥१५॥विद्यावंतंयशस्वंतंल
क्ष्मीवंतंजनंकुरु॥रूपं०॥१६॥चतुर्भुजेचतुर्वक्त्रसंस्तु
तेपरमेश्वरि॥रूपंदेहि०॥१७॥कृष्णेनसंस्तुतेदेविश
श्वद्भक्त्यातथांबिके॥रूपं०॥१८॥हिमाचलसुतानाथ

राम०
९

संस्तुतेपरमेश्वरि॥रूपं०॥१९॥इंद्राणीपतिसद्भाववपू
जितेपरमेश्वरि॥रूपं०॥२०॥देविप्रचंडदोर्दंडदैत्य
दर्पविनाशिनि॥रूपं०॥२१॥देविभक्तजनोद्दामदत्ता
नंदोदयेंबिके॥रूपं०॥२२॥पत्नींमनोरमांदेहिमनो
वृत्तानुसारिणीं॥तारिणींदुर्गसंसारसागरस्यकुलो
द्भवां॥२३॥इदंस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः॥स
तुसप्तशतींसंख्यावरमाप्नोतिसंपदः॥२४॥ ॥इत्य

स०ती १० र्गबास्तुतिः॥ ॥ओं नमश्चंडिकायै॥ ॥विशुद्धज्ञान
१० देहायत्रिवेदीदिव्यचक्षुषे॥ श्रेयःप्राप्तिनिमित्तायन
मः सोमार्द्धधारिणे॥१॥ सर्वमेतद्विनायस्तु मंत्राणा
मभिकीलकं॥ सोपि क्षेममवाप्नोति सततं जाप्यतत्प
रः॥२॥ सिद्ध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि॥ राम:
एतेन स्तुवतां देवीं स्तोत्रमंत्रेपासिद्धिदं॥३॥ नमंत्रंनौ १०
षधंतत्र न किंचिदपि विद्यते॥ विनाजाप्येन सिद्ध्येतस

र्वमुच्चाटनादिकं॥४॥ समस्तान्यपि सिद्ध्यंति लोकशंका
मिमांहरः॥ कृत्वा निमंत्रयामास सर्वमेवमिदं शुभं॥५॥
स्तोत्रं चे चंडिकायास्तु तच्च गुह्यं चकार सः॥ समाप्नोति
पं सुपुण्येन तां यथावन्निमंत्रणां॥६॥ सोपि क्षेममवा
प्नोति सर्वमेव न संशयः॥ कृष्णायां वा चतुर्दश्यामष्ट
म्यां वा समाहितः॥७॥ ददाति प्रतिगृह्णाति नान्यथैषाप्र
सीदति॥ इत्थं रूपेण कीलेन महादेवेन कीलितं॥८॥

स०ती
११

योनिःकीलकांविधायैनांनित्यंजपतिसंस्फुटं॥ससिद्धः
सगणःसोपिगंधर्वोजायतेवने॥९॥नचैवाप्पटतस्त
स्यभयंक्वापिहिजायते॥नापमृत्युवशंयातिमृतोमो
क्षमवाप्नुयात्॥१०॥ज्ञात्वाप्रारभ्यकुर्वीतह्यकुर्वाणो
विनश्यति॥ततोज्ञात्वैवसंपन्नमिदंप्रारभ्यतेबुधैः॥११॥ रामः
सौभाग्यादिचयत्किंचिद्दृश्यतेललनाजने॥तत्सर्वंत ११
त्प्रसादेनतेनजाप्यमिदंनतु॥१२॥शनैस्तुजाप्यमाने

स्मिंस्तोत्रेसंपत्तिरुच्चकैः॥भवत्येवसमग्रापिततःप्रार
भ्यमेवतत्॥१३॥ऐश्वर्यंयत्प्रसादेनसौभाग्यारोग्य
संपदः॥शत्रुहानिःपरोमोक्षःस्तूयतेसानकिंजनैः॥
१४॥ ॥इतिकीलकं॥ ॥श्रींनमश्चंडिकायै॥ ॥अ
स्यश्रीसप्तशतीस्तोत्रमालामंत्रस्य॥ब्रह्माविष्णुरुद्रा
ऋषयः॥महाकालीमहालक्ष्मीमहासरस्वत्योदेवताः॥
गायत्र्युष्णिगनुष्टुप्छंदांसि॥नंदाशाकंभरीभीमाः

स॰ती
१२

शक्तयः॥ रक्तदंतिका दुर्गा भ्रामरी बीजानि॥ अग्निर्वायुः
सूर्यस्तत्त्वानि॥ श्रीदुर्गाप्रीत्यर्थं जपे विनियोगः॥ ॥
ॐ॥ ॥सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः॥
निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥ १॥ महामाया
नुभावेन यथा मन्वंतराधिपः॥ स बभूव महाभागः
सावर्णिस्तनयो रवेः॥ २॥ स्वारोचिषेंतरे पूर्वं चैत्रवंश
समुद्भवः॥ सुरथो नाम राजाभूत्समस्ते क्षितिमंडले॥ ३॥

राम॰
१२

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्॥ बभूवुः
शत्रवो भूपाः कोला विध्वंसिनस्तदा॥ ४॥ तस्यतैरभव
द्युद्धमतिप्रबलदंडिनः॥ न्यूनैरपि स तैर्युद्धे कोलावि
ध्वंसिभिर्जितः॥ ५॥ ततः स्वपुरमायातो निजदेशाधि
पोऽभवत्॥ आक्रांतः स महाभागस्तैस्तदा प्रबलारि
भिः॥ ६॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः॥ ततोमृ

स॰ती
१३

गयाव्याजेन हृतः स्वाम्यः सअश्वपतिः ॥ एकाकी हयमा
रुह्य जगाम गहनं वनं ॥८॥ स तत्राश्रममद्राक्षीद्द्विज
वर्यस्य मेधसः ॥ प्रशांतःश्वापदाकीर्णं मुनिशिष्योप
शोभितं ॥९॥ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः
॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥१०॥ सोऽचिं
तयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितं पूर्वं
मया हीनं पुरं हि तत् ॥११॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पा

रामः॰
१३

ल्यते न वा ॥ न जाने स प्रधानो मे शूरहस्ती सदामदः ॥१२॥
मम वैरिवशं यातः कान्भोगानुपलप्स्यते ॥ ये ममानु
गता नित्यं प्रसादधनभोजनैः ॥१३॥ अनुवृत्तिं ध्रुवं ते
द्य कुर्वंत्यन्यमहीभृतां ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः
सततं व्ययं ॥१४॥ संचितः सोतिदुःखेन क्षयं कोशो गमि
ष्यति ॥ एतच्चान्यच्च सततं चिंतयामास पार्थिवः ॥१५॥ त
त्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन क

स॰ती स्त्वंभोहेतुश्चागमनेत्रकः॥१६॥सशोकइवकस्मात्त्वंदु
१४ र्मनाइवलक्ष्यसे॥इत्याकर्ण्यवचस्तस्यभूपतेःप्रण
योदितं॥१७॥प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपं॥वैश्यउ०॥
समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले॥१८॥पुत्र
दारैर्निरस्तश्चधनलोभादसाधुभिः॥विहीनश्चधनै राम:॰
र्दारैःपुत्रैरादायमेधनं॥१९॥वनमभ्यागतोदुःखी १४
निरस्तश्चाप्तबंधुभिः॥सोहंनवेद्मिपुत्राणांकुशलाकु

शलात्मिकां॥२०॥प्रवृत्तिंस्वजनानांचदाराणांचात्रसं
स्थितः॥किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥२१॥
कथंतेकिंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः॥ ॥राजोवा
च॥ ॥यैर्निरस्तोभवांल्लुब्धैःपुत्रदारादिभिर्धनैः॥त
२२॥तेषुकिंभवतःस्नेहमनुबध्नातिमानसं॥ ॥वैश्य
उवाच॥ ॥एवमेतद्यथाप्राहभवानस्मद्गतंवचः॥२३॥
किंकरोमिनबध्नातिममनिष्ठुरतांमनः॥यैःसंत्यज्य

स०ती
१५

पितृस्नेहं धनलुब्धैर्निराकृतः॥२४॥पतिः स्वजनहार्दं
च हार्दि तेष्वेव मे मनः॥ किमेतन्नाभिजानामि जानन्नपि
महामते॥२५॥यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधु
षु॥ तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते॥२६॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं॥ ॥मार्कंडेय
उवाच॥ ॥ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ॥
२७॥समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः॥कृत्वा

राम:
१५

तु तौ यथान्यायं यथार्हं तेन संविदं॥२८॥उपविष्टौ क
थाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥ ॥राजोवाच॥ ॥भ
गवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्॥२९॥दुःखाय
यन्मे मनसः स्वचित्तायत्ततां विना॥ममत्वं गतराज्यस्य
राज्यांगेष्वखिलेष्वपि॥३०॥जानतोपि यथाज्ञस्य किमे
तन्मुनिसत्तम॥अयं च निःकृतः पुत्रैर्दारैर्भृत्यैस्तथो
ज्झितः॥३१॥स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति॥र

स॰ती
१६

वमेषतथाहंचद्वावप्यसंतदुःखितौ॥३३॥दृष्टदोषे
पिविषयेममत्वाकृष्टमानसौ॥तत्किमेतन्महाभागय
न्मोहोज्ञानिनोरपि॥३४॥ममास्यचभवत्येषाविवेकां
धस्यमूढता॥ ॥ऋषिरुवाच॥ ॥ज्ञानमस्तिसमस्तस्य
जंतोर्विषयगोचरे॥३६॥विषयश्चमहाभागयातिचै
वंपृथकपृथक॥दिवांधाःप्राणिनःकेचिद्रात्रावंधा
स्तथापरे॥३७॥केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः॥

राम॰
१६

ज्ञानिनोमनुजाःसत्यंकिंनुतेनहिकेवलं॥३८॥यतोहि
ज्ञानिनःसर्वेपशुपक्षिमृगादयः॥ज्ञानंचतन्मनुष्या
णांयत्तेषांमृगपक्षिणां॥३९॥मनुष्याणांचयत्तेषांतु
ल्यमन्यत्तथोभयोः॥ज्ञानेपिसतिपश्यैतान्पतंगांछा
वचंचुषु॥४०॥कणमोक्षादृतान्मोहात्पीड्यमानानपि
क्षुधा॥मानुषामनुजव्याघ्रसाभिलाषाःसुतान्प्रतिलो
भोत्प्रत्युपकारायनन्वेतेकिंनुपश्यसि॥तथापिमम

स॰ती
१७

तावर्त्तेमोहगर्त्तेनिपातिताः॥ ४०॥ महामायाप्रभावेन
संसारस्थितिकारिणा॥ ॥ तन्नात्रविस्मयःकार्योयोग
निद्राजगत्पतेः॥ ४१॥ महामायाहरेश्चैषातयासंमोह्य
तेजगत॥ ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा॥ ४२॥
बलादाकृष्यमोहायमहामायाप्रयच्छति॥ तयाविसृ रामः
ज्यतेविश्वंजगदेतच्चराचरं॥ ४३॥ सैषाप्रसन्नावरदानृणां १७
भवतिमुक्तये॥ साविद्यापरमामुक्तेर्हेतुभूतासनातनी॥ ४४॥

संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी॥ ॥ राजोवाच॥ ॥
भगवन्काहिसादेवीमहामायेतियांभवान्॥ ४५॥ ब्रवी
तिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज॥ यत्स्वभावाच
सादेवीयत्स्वरूपायदुद्भवा॥ ४६॥ तत्सर्वंश्रोतुमिच्छामि
त्वत्तोब्रह्मविदांवर॥ ॥ ऋषिरुवाच॥ ॥ नित्यैवसाजग
न्मूर्त्तिस्तयासर्वमिदंततं॥ ४७॥ तथापितत्समुत्पत्तिर्ब
हुधाश्रूयतांमम॥ देवानांकार्यसिध्यर्थमाविर्भवतिसायदा॥

स॰ती
१८

४८ ॥उत्पन्नेतितदालोकेसानित्याप्यविधीयते॥योग
निद्रांयदाविष्णुर्जगत्येकार्णवीकृते॥४९॥आस्तीर्यशे
षमभजत्कल्पांतेभगवान्प्रभुः॥तदाद्वावसुरौघोरौवि
ख्यातौमधुकैटभौ॥५०॥विष्णुकर्णमलोद्भूतौहंतुंब्रह्मा
णमुद्यतौ॥सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजाप रामः
तिः॥५१॥दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचजनार्दनं॥तुष्टा १८
वयोगनिद्रांतामेकाग्रहृदयस्थितः॥५२॥विबोधनार्था

यहरेर्हरिनेत्रकृतालयां॥विश्वेश्वरींजगद्धात्रींस्थिति
संहारकारिणीं॥५३॥निद्रांभगवतींविष्णोरतुलांतेज
सःप्रभुः॥॥ब्रह्मोवाच॥॥त्वंस्वाहात्वंस्वधात्वंहिव
षट्कारःस्वरात्मिका॥५४॥सुधात्वमक्षरेनित्येत्रिधा
मात्रात्मिकास्थिता॥अर्धमात्रास्थितानित्यायानुच्चा
र्याविशेषतः॥५५॥त्वमेवसंध्यासावित्रीत्वंदेविजन
नीपरा॥त्वयैवधार्यतेविश्वंत्वयैतत्सृज्यतेजगत्५६॥

स.ती
१९

त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा॥विसृष्टौसृष्टिरूपा
त्वंस्थितिरूपाचपालने॥५७॥तथासंहृतिरूपांतेजगतोस्य
जगन्मये॥महाविद्यामहामायामहामेधामहास्मृतिः॥५८
॥महामोहाचभवतीमहादेवीमहासुरी॥प्रकृतिस्त्वंचसर्व
स्यगुणत्रयविभाविनी॥५९॥कालरात्रिर्महारात्रिर्मोह राम॰
रात्रिश्चदारुणा॥त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधल १९
क्षणा॥६०॥लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच॥

खड्गिनीशूलिनीघोरागदिनीचक्रिणीतथा॥६१॥शंखि
नीचापिनीबाणभुशुंडीपरिघायुधा॥सौम्यासौम्य
तराशेषसौम्येभ्यस्त्वतिसुंदरी॥६२॥परापराणांपरमा
त्वमेवपरमेश्वरी॥यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखि
लात्मिके॥६३॥तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूय
सेतदा॥ययात्वयाजगत्स्रष्टाजगत्पात्यत्तियोजगत् य
॥६४॥सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः॥

स॰ती
२०

विष्णुः शरीरग्रहणमहमीशान एव च ॥ ६५ ॥ कारिता
स्ते यतोतस्त्वां कस्तोतुं शक्तिमान्भवेत ॥ सात्वमित्थंप्र
भावैस्वैरुदारैर्देविसंस्तुता ॥ ६६ ॥ मोहयैतौ दुराधर्षा
वसुरौ मधुकैटभौ ॥ प्रबोधंच जगत्स्वामी नीयता
मच्युतो लघु ॥ ६७ ॥ बोधश्च क्रियतामस्य हंतुमेतौ
महासुरौ ॥ ॥ ऋषिरुवाच ॥ ॥ एवं स्तुता तदा देवी ता
मसी तत्र वेधसा ॥ ६८ ॥ विष्णोः प्रबोधनार्थाय निहं

राम॰
२०

तुं मधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथो
रसः ॥ ६९ ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोव्यक्तजन्म
नः ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ ७० ॥
एकार्णवे हिशयनात्ततः स ददृशे च तौ ॥ मधुकैटभौ
दुरात्मानावतिवीर्यपराक्रमौ ॥ ७१ ॥ क्रोधरक्तेक्षणा
वत्तुं ब्रह्माणं जनितोद्यमौ ॥ समुत्थाय ततस्ताभ्यां
युयुधे भगवान्हरिः ॥ ७२ ॥ पंचवर्षसहस्राणि बाहु

स॰ती
२१

प्रहृष्टौ विभुः ॥ तावप्यतिबलोन्मत्तौ महामायावि
मोहितौ ॥७३॥ उक्तवंतौ वरोस्मत्तो व्रियतामिति केश
वं ॥ ॥भगवानुवाच॥ ॥भवेतामद्य मे तुष्टौ मम वध्या
वुभावपि ॥७४॥ किमन्येन वरेणात्र एतावद्धि वृतं म
म ॥ ॥ऋषिरुवाच॥ ॥वंचिताभ्यामिति तदा सर्वमा तामठ०
पोमयं जगत ॥७५॥ विलोक्य ताभ्यां गदितो भगवा २१
न्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी सलिलेन प
१ प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥१

रिप्लुता ॥७६॥ ॥ऋषिरुवाच॥ ॥तथेत्युक्त्वा भगवता
शंखचक्रगदाभृता ॥ कृत्वा चक्रेण वै छिन्ने जघने शिर
सी तयोः ॥७७॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्व
यं ॥ प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ७८
॥ ॥इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमा
हात्म्ये मधुकैटभवधः १ ॥ ॥ऋषिरुवाच॥ ॥देवा
सुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ महिषेसुराणाम

स॰ती
२२

धिपेदेवानांचपुरंदरे ॥१॥ तत्रासुरैर्महावीर्यैर्देवसै
न्यंपराजितं ॥ जित्वाचसकलान्देवानिंद्रोऽभून्महिषा
सुरः ॥२॥ ततः पराजितादेवाः पद्मयोनिंप्रजापतिं ।
पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ ॥३॥ यथावृत्तं
तयोस्तद्वन्महिषासुरचेष्टितं ॥ त्रिदशाः कथयामासुर्दे
वाभिर्नवविस्तरं ॥४॥ सूर्येंद्राग्न्यनिलेंदूनांयमस्य
वरुणस्यच ॥ अन्येषांचाधिकारान्सस्वयमेवाधितिष्ठति ॥५

रामः
२२

स्वर्गान्निराकृताः सर्वेतेनदेवगणाभुवि ॥ विचरंतियथा
मर्त्यामहिषेणदुरात्मना ॥६॥ एतद्वः कथितंसर्वममरा
रिविचेष्टितं ॥ शरणंवः प्रपन्नास्मोवधस्तस्यविचिंत्य
तां ॥७॥ ॥ ऋषिरुवाच ॥ इत्थंनिशम्यदेवानांवचांसि
मधुसूदनः ॥ चकारकोपंशंभुश्च भ्रुकुटीकुटिलाननौ
॥८॥ ततोतिकोपपूर्णस्यचक्रिणोवदनात्ततः ॥ निश्च
क्राममहत्तेजोब्रह्मणः शंकरस्यच ॥९॥ अन्येषांचैव

प०ती
२२

देवानांशक्रादीनांशरीरतः॥निर्गतंसुमहत्तेजस्तच्चैक्यं
समगच्छत॥१०॥अतीवतेजसः कूटंज्वलंतमिवपर्व
तं॥ददृशुस्तेसुरास्तत्रज्वालाव्याप्तदिगंतरं॥११॥अ
तुल्यंतत्रतत्तेजःसर्वदेवशरीरजं॥एकस्थंतदभून्ना
रीव्याप्तलोकत्रयंत्विषा॥१२॥यदभूच्छांभवंतेजस्ते राम:०
नाजायततन्मुखं॥याम्येनचाभवन्केशाबाहवोविष्णु २३
तेजसा॥१३॥सौम्येनस्तनयोर्युग्मंमध्यंचैंद्रेणचाभवत्॥

वारुणेनचजंघोरूनितंबस्तेजसाभुवः॥१४॥ब्रह्म
णस्तेजसापादौतदंगुल्योर्कतेजसा॥वसूनांचक
रांगुल्यःकौबेरेणचनासिका॥१५॥तस्यास्तुदंताः
संभूताःप्राजापत्येनतेजसा॥नयनत्रितयंजज्ञेतथा
पावकतेजसा॥१६॥भ्रुवौचसंध्ययोस्तेजःश्रवणाव
निलस्यच॥अन्येषांचैवदेवानांसंभवस्तेजसांशि
वा॥१७॥ततःसमस्तदेवानांतेजोराशिसमुद्भवां॥

स॰ती
२८

तांविलोक्यमुदंप्रापुरमरामहिषार्द्दिताः ॥ १८ ॥ शूलंशू
लाद्विनिष्कृष्यददौतस्यैपिनाकधृक् ॥ चक्रंचदत्तवा
न्कृष्णः समुत्पाद्यस्वचक्रतः ॥ १९ ॥ शंखंचवरुणः श
क्तिंददौतस्यैहुताशनः ॥ मारुतोदत्तवांश्चापंबाणपू
र्णेतथेषुधी ॥ २० ॥ वज्रमिंद्रः समुत्पाद्यकुलिशादम
राधिपः ॥ ददौतस्यैसहस्राक्षोघंटामैरावताद्गजात् ॥ २१ ॥
कालदंडाद्यमोदंडंपाशंचांबुपतिर्ददौ ॥ प्रजापतिश्चाक्ष

रामः
२८

मालांददौब्रह्माकमंडलुं ॥ २२ ॥ समस्तरोमकूपेषुनि
जरश्मीन्दिवाकरः ॥ कालश्चदत्तवान्खड्गंतस्याश्चर्म
चनिर्मलं ॥ २३ ॥ क्षीरोदश्चामलंहारमजरेचतथांब
रे ॥ चूडामणिंतथादिव्यंकुंडलेकटकानिच ॥ २४ ॥ अ
र्द्धचंद्रंतथाशुभ्रंकेयूरान्सर्वबाहुषु ॥ नूपुरौविमलौ
तद्वद्ग्रैवेयकमनुत्तमं ॥ २५ ॥ अंगुलीयकरत्नानिसम
स्तास्वंगुलीषुच ॥ विश्वकर्माददौतस्यैपरशुंचातिनिर्मलं ॥ २६

सं.टी. २५

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दर्शनं॥ अम्लानपंक
जां मालां शिरस्युरसि चापरां॥ २७॥ अददज्जलधिस्त
स्यै पंकजं चातिशोभनं॥ हिमवान्वाहनं सिंहं रत्नानि वि
विधानि च॥ २८॥ ददावस्यं सुरयापानपात्रं धनाधि
पः॥ शेषश्च सर्वनागेशो महामणिविभूषितं॥ २९॥ ना राम ३
गहारं ददौ तस्यै धत्ते यः पृथिवीमिमां॥ अन्यैरपि सुरैर्दे २५
वी भूषणैरायुधैस्तथा॥ ३०॥ संमानिता ननादोच्चैः साट्ट

हासं मुहुर्मुहुः॥ तस्यानादेन घोरेण कृत्स्नमापूरितं नभः॥
३१॥ अमायतातिमहता प्रतिशब्दो महानभूत्॥ चुक्षु
भुः सकला लोकाः समुद्राश्च चकंपिरे॥ ३२॥ चचाल व
सुधा चेलुः सकलाश्च महीधराः॥ जयेति देवाश्च मु
दा तामूचुः सिंहवाहिनीं॥ ३३॥ तुष्टुवुर्मुनयश्चैनां भक्ति
नम्रात्ममूर्त्तयः॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरा
रयः॥ ३४॥ संनद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥

स॰ती
२९

आः किमेतदितिक्रोधादाभाष्यमहिषासुरः ॥३५॥ अभ्य
धावततंशब्दमशेषैरसुरैर्वृतः ॥ सददर्शततोदेवींव्या
प्तलोकत्रयांत्विषा ॥३६॥ पादाक्रांत्यानतभुवंकिरीटो
ल्लिखितांबरां ॥ क्षोभिताशेषपातालांधनुर्ज्यानिःस्वने
नतां ॥३७॥ दिशोभुजसहस्रेणसमंताद्व्याप्यसंस्थि राम॰
तां ॥ ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषां ॥३८॥ शस्त्रा २९
स्त्रैर्बहुधामुक्तैरादीपितदिगंतरं ॥ महिषासुरसेनानी

श्चिक्षुराख्योमहासुरः ॥३९॥ युयुधेचामरश्चान्यैश्चतुरंग
बलान्वितः ॥ रथानामयुतैःषड्भिरुदग्राख्योमहासुरः ॥
४०॥ अयुध्यतायुतानांचसहस्रेणमहाहनुः ॥ पंचा
शद्भिश्चनियुतैरसिलोमामहासुरः ॥४१॥ अयुतानां
शतैःषड्भिर्बाष्कलोयुयुधेरणे ॥ गजवाजिसहस्रौघैर
नेकैःपरिवारितः ॥४२॥ वृतोरथानांकोट्याचयुद्धेतस्मि
न्नयुध्यत ॥ बिडालाख्योयुतानांचपंचाशद्भिरथायुतैः ॥४३

स॰ती
२७

युयुधेसंयुगेतत्ररथानांपरिवारितः॥ अन्यैश्चतत्रायुत
शोरथनागहयैर्वृताः॥ ४४ ॥ युयुधुःसंयुगेदेव्यासहत
त्रमहासुराः॥ कोटिकोटिसहस्रैस्तुरथानांदंतिनांतथा
॥ ४५ ॥ हयानांचवृतोयुद्धेतत्राभून्महिषासुरः॥ तोमरैर्भिं
दिपालैश्चशक्तिभिर्मुसलैस्तथा॥ ४६ ॥ युयुधुःसंयुगे राम॰
देव्याखड्गैःपरशुपट्टिशैः॥ केचिच्चचिक्षिपुःशक्तीःके २७
चित्पाशांस्तथापरे॥ ४७ ॥ देवींखड्गप्रहारैस्तुतेतांहंतुंप्र

चक्रमुः॥ सापिदेवीततस्तानिशस्त्राण्यस्त्राणिचंडिका॥
४८ ॥ लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी॥ अ
नायस्ताननादेवीस्तूयमानासुरर्षिभिः॥ ४९ ॥ मुमोचा
सुरदेहेषुशस्त्राण्यस्त्राणिचेश्वरी॥ सोपिक्रुद्धोधुत
सटोदेव्यावाहनकेसरी॥ ५० ॥ चचारासुरसैन्येषुवने
ष्विवहुताशनः॥ निःश्वासान्मुमुचेयांश्चयुध्यमाना
रणेंबिका॥ ५१ ॥ तएवसद्यःसंभूतागणाःशतसहस्रशः॥

स॰ती युयुधुस्तेपरशुभिर्भिन्दिपालासिपट्टिशैः ॥५२॥ नाश
२८ यंतोसुरगणान्देवीशक्त्युपबृंहिताः ॥ अवादयंतपट
हान्गणाः शंखांस्तथापरे ॥५३॥ मृदंगांश्चतथैवा
न्येतस्मिन्युद्धमहोत्सवे ॥ ततोदेवीत्रिशूलेनगदया
शक्तिवृष्टिभिः ॥५४॥ खड्गादिभिश्चशतशोनिजघा राम॰
नमहासुरान् ॥ पातयामासचैवान्यान्घंटास्वनवि २८
मोहितान् ॥५५॥ असुरान्भुविपाशेनबद्ध्वाचान्यानकर्षयत् ॥ म॰

केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥५६॥ वि
पोथितानिपातेनगदयाभुविशेरते ॥ वेमुश्चकेचिद्रुधि
रंमुसलेनभृशंहताः ॥५७॥ केचिन्निपतिताभूमौभि
न्नाः शूलेनवक्षसि ॥ निरंतराः शरौघेणकृताः केचि
द्रणाजिरे ॥५८॥ सेनानुकारिणः प्राणान्मुमुचुस्त्रिद
शार्दनाः ॥ केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥
॥५९॥ शिरांसिपेतुरन्येषामन्येमध्येविदारिताः ॥ विच्छि

स॰ती
२२

नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः॥६०॥एकबाह्वक्षि
चरणाःकेचिद्देव्याद्विधाकृताः॥छिन्नेपिचान्येशिरसि
पतिताःपुनरुत्थिताः॥६१॥कबंधायुयुधुर्देव्यागृ
हीतपरमायुधाः॥ननृतुश्चापरेतत्रयुद्धेतूर्यलया
श्रिताः॥६२॥कबंधाश्छिन्नशिरसःखड्गशक्त्यृष्टिपा राम ३०
णयः॥तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः॥६३॥ २९
पातितैरथनागाश्वैरसुरैश्चवसुंधरा॥अगम्यासा

भवत्तत्रयत्राभूत्समहारणः॥६४॥शोणितौघामहा
अध २ नद्यःसद्यस्तत्रविसुस्रुवुः॥मध्येचासुरसैन्यस्यवारणासु
रवाजिनां॥६५॥क्षणेनतन्महासैन्यमसुराणांतथां
बिका॥निन्येक्षयंयथावह्निस्तृणदारुमहाचयं॥६६॥
सचसिंहोमहानादमुत्सृजंधुतकेसरः॥शरीरेभ्योम
रारीणामसूनिवविचिन्वति॥६७॥देव्यागणैश्चतैस्त
त्रकृतंयुद्धंतथासुरैः॥यथैषांतुतुषुर्देवाःपुष्पवृष्टि

स॰ती ३० मुदादिवि ॥ ६८ ॥ ॥ इति मार्कंडेयपुराणे॰ महिषासु
रसैन्यवधः २ ॥ ऋषिरुवाच ॥ ॥ निहन्यमानं तत्सै
न्यमवलोक्यमहासुरः ॥ सेनानीश्चिक्षुरः कोपाद्य
यौयोद्धुमथांबिकां ॥ १ ॥ सदेवींशरवर्षेणववर्षसम
रेसुरः ॥ यथामेरुगिरेःशृंगंतोयवर्षेणतोयदः २ ॥ राम॰
तस्यछित्वाततोदेवीलीलयैवशरोत्करान् ॥ जघान ३०
तुरगान्बाणैर्यंतारंचैववाजिनां ॥ ३ ॥ चिछेदचधनुः

सद्योध्वजंचातिसमुछ्रितं ॥ विव्याधचैवगात्रेषुछिन्न
धन्वानमाशुगैः ॥ ४ ॥ सछिन्नधन्वाविरथोहताश्वो
हतसारथिः ॥ अभ्यधावततांदेवींखड्गचर्मधरोसुरः
॥ ५ ॥ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि ॥ आज
घानभुजेसव्येदेवीमप्यतिवेगवान् ॥ ६ ॥ तस्याःख
ड्गोभुजंप्राप्यपफालनृपनंदन ॥ ततोजग्राहशूलंस
कोपादरुणलोचनः ॥ ७ ॥ चिक्षेपचततस्ततुभद्रका

स॰ती
३१

स्यांमहासुरः॥जाज्वल्यमानंतेजोभीरविबिंबमिवांबरा
त॥८॥दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत॥तच्छूलं
शतधातेननीतंसचमहासुरः॥९॥हतेतस्मिंन्महावीर्ये
महिषस्यचमूपतौ॥आजगामगजारूढश्चामरस्त्रि
दशार्दनः॥१०॥सोपिशक्तिंमुमोचाथदेव्यास्तामंबिका राम॰
द्रुतं॥हूंकाराभिहतांभूमोपातयामासनिःप्रभां॥११॥ ३१
भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः॥चिक्षेप

चामरःशूलंबाणैस्तदपिसाछिनत॥१२॥ततःसिंहः
समुत्पत्यगजकुंभांतरेस्थितः॥बाहुयुद्धेनयुयुधे
तेनोच्चैस्त्रिदशारिणा॥१३॥युध्यमानौततस्तौतुत
स्मान्नागान्महींगतौ॥युयुधातेतिसंरब्धौप्रहारैरति
दारुणैः॥१४॥ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा
॥करप्रहारेणशिरश्चामरस्यपृथक्कृतं॥१५॥उदग्रश्च
रणेदेव्याशिलावृक्षादिभिर्हतः॥दंतमुष्टितलैश्चैव

स॰ती
३२

कराच्च निपातितः ॥१६॥ देवीक्रुद्धागदापातैश्चूर्णया
मासचोद्धतं ॥ बाष्कलं भिंदिमालेन बाणैस्ताम्रंतथांधकं
॥१७॥ उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं ॥ त्रिनेत्रा
चत्रिशूलेनजघानपरमेश्वरी ॥१८॥ बिडालस्यासि
नाकायात्पातयामासवैशिरः ॥ दुर्धरंदुर्मुखंचोभौश रामः
शरैर्निन्येयमक्षयं ॥१९॥ एवंसंक्षीयमाणेतुस्वसैन्येम ३२
हिषासुरः ॥ माहिषेणस्वरूपेणत्रासयामासतान्गणान् २०॥

कांश्चित्तुंडप्रहारेणखुरक्षेपैस्तथापरान् ॥ लांगूलता
डितांश्चान्यान्शृंगाभ्यां चविदारितान् ॥२१॥ वेगे
नकांश्चिदपरान्नादेनभ्रमणेनच ॥ निःश्वासपवने
नान्यान्पातयामासभूतले ॥२२॥ निपात्यप्रमथानीक
मभ्यधावतसोसुरः ॥ सिंहंहंतुंमहादेव्याःकोपंचक्रेततो
ंबिका ॥२३॥ सोपिकोपान्महावीर्यःखुरक्षुण्णमहीतलः ।
शृंगाभ्यांपर्वतानुच्चैश्चिक्षेपचननादच ॥२४॥ वेगभ्र

स० ती
३३

मपा विक्षुण्णा मही तस्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः
प्लावयामास सर्वतः ॥२५॥ धुतशृंगविभिन्नाश्च खं
डं खंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपे
तुर्नभसोऽचलाः ॥२६॥ इति क्रोधसमाध्मातमापतंतं
महासुरं ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ रामः
२७॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं ॥ तत्याज ३३
माहिषं रूपं सोऽपि बद्धो महामृधे ॥२८॥ ततः सिंहोऽभ

वत्सद्यो यावत्तस्यांबिका शिरः ॥ छिनत्ति तावत्पुरुषः
खड्गपाणिरदृश्यत ॥२९॥ तत एवाशु पुरुषं देवी चिच्छे
द सायकैः ॥ तं खड्गचर्मणा सार्द्धं ततः सोऽभून्महागजः
॥३०॥ करेण च महासिंहं तं चकर्ष जगर्ज च ॥ कर्षतस्तु
करं देवी खड्गेन निरकृंतत ॥३१॥ ततो महासुरो भूयो
माहिषं वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं
सचराचरं ॥३२॥ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं ॥

स॰ती
३७

पपौपुनःपुनश्चैवजहासारुणलोचना॥३३॥ननर्द
चासुरःसोपिबलवीर्यमदोद्धतः॥विषाणाभ्यांचचिक्षे
पचंडिकांप्रतिभूधरान्॥३४॥साचतान्प्रहितांस्तेनचू
र्णयंतीशरोत्करैः॥उवाचतंमदोद्धूतमुखरागाकुलाक्ष
रं॥३५॥ ॥देव्युवाच॥ ॥गर्जगर्जक्षणंमूढमधुया राम॰
वत्पिबाम्यहं॥मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः॥ ३७
३६॥एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं॥पादेनाक्र

म्यकंठेचशूलेनैनमताडयत॥३७॥ततःसोपिपदा
क्रांतस्तयानिजमुखात्ततः॥अर्द्धनिष्क्रांतएवातिदेव्या
वीर्येणसंवृतः॥३८॥अर्धनिष्क्रांतएवासौयुध्यमानो
महासुरः॥तयामहासिनादेव्याशिरश्छित्वानिपाति
तः॥३९॥ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत्॥प्र
हर्षंचपरंजग्मुःसकलादेवतागणाः॥४०॥तुष्टुवुस्तां
सुरादेवींसहदिव्यैर्महर्षिभिः॥जगुर्गंधर्वपतयोननृतु

देवे

स०ती
३५

श्वाप्सरोगणाः॥४३॥ ॥इतिमार्कंडेयपुराणे॰महिषासु
रवधः॥ ३ ऋषिरुवाच॥ ॥शक्रादयःसुरगणानि
हतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या॥तांतु
ष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपुलको
द्गमचारुदेहाः॥१॥देव्याययाततमिदंजगदात्मश राम॰
देवा ऊचुः क्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्या॥तामंबिका ३५
मखिलदेवमहर्षिपूज्यांभक्त्यानताःस्मविदधातुशुभा

निसानः॥२॥यस्याःप्रभावमतुलंभगवाननंतोब्र
ह्माहरश्चनहिवक्तुमलंबलंच॥साचंडिकाखिल
जगत्परिपालनायनाशायचाशुभभयस्यमतिंकरो
तु॥३॥याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापा
त्मनांकृतधियांहृदयेषुबुद्धिः॥श्रद्धासतांकुलजन
प्रभवस्यलज्जातांत्वांनताःस्मपरिपालयदेविविश्वं
॥४॥किंवर्णयामतवरूपमचिंत्यमेतत्किं

स॰ती
३८

वतिवीर्यमसुरक्षयकारि भूरि॥ किं चाहवेषु चरितानि त
ऽतियानि सर्वेषु देव्यसुरदेवगणादिकेषु॥५॥ हेतुः सम
स्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपा
रा॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि प
रमा प्रकृतिस्त्वमाद्या॥६॥ यस्याः समस्तसुरता समुदी रामः
रणेन तृप्तिं प्रयाति सकलेषु मखेषु देवी॥ स्वाहासि वै ३८
पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्व

धा च॥७॥ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सु
नियतेंद्रियतत्त्वसारैः॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्त
दोषैर्विद्यासि सा भगवती परमा हि देवी॥८॥ शब्दात्मिका
सुनिर्मलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां
च साम्नां॥ देवि त्रयी भगवती भवभावनाय वार्त्ता च सर्व
जगतां परमार्तिहंत्री॥९॥ मेधासि देवि विदिताखिलशा
स्त्रसारा दुर्गासि दुर्गभवसागरनौरसंगा॥ श्रीः कैटभारि

स॰ती
२८

हृदये कृताधिवासा गौरि त्वमेव शशिमौलिकृतप्र
तिष्ठा॥१०॥ ईषत्सहासममलं परिपूर्णचंद्रबिंबानुका
रि कनकोत्तमकांतिकांतं॥ अत्यद्भुतं प्रहृतमात्तरुषा त
थापि वक्त्रं विलोक्य सहसा महिषासुरेण॥११॥ दृष्ट्वा
तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि
यन्न सद्यः॥ प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जी
व्यते हि कुपितांतकदर्शनेन॥१२॥ देवि प्रसीद परमा भ

राम॰
२८

य

वती भवाय सद्यो विनाशयसि कोपवती कुलानि॥ विज्ञात
मेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासु
रस्य॥१३॥ ते संमता जनपदेषु धनानि तेषां तेषां यशां
सि न च सीदति धर्मवर्गः॥ धन्यास्त एव निभृतात्मज भृ
त्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना॥१४॥ धर्म्या
णि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सु
कृती करोति॥ स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्र

स॰ती
३९

येपिफलदाननुदेवितेन ॥१५॥ दुर्गेस्मृताहरसिभीतिमशे
षजंतोः स्वस्थैः स्मृतामतिमतीवशुभांददासि ॥ दारिद्र्य
दुःखभयहारिणिकात्वदन्यासर्वोपकारकरणायसदा
र्द्रचित्ता ॥१६॥ एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वंतुनाम
नरकायचिरायपापं ॥ संग्राममृत्युमधिगम्यदिवंप्रयां रामः
तुमत्वेतिनूनमहितान्विनिहंसिदेवि ॥१७॥ दृष्ट्वैवकिंन ३९
भवतीप्रकरोतिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं ॥

लोकान्प्रयांतुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भवतितेष्वपि
तेसुसाध्वी ॥१८॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शू
लाग्रकांतिनिवहेनदृशोसुराणां ॥ यन्नागताविलयमं
शुमदिंदुखंडयोग्याननंतवविलोकयतांतदेतत् ॥१९॥
दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यम
तुल्यमन्यैः ॥ वीर्यंचहंतृहृतदेवपराक्रमाणांवैरिष्वपि
प्रकटितैवदयात्वयेत्थं ॥२०॥ केनोपमाभवतुतेस्यपराक्र

स॰ती २१

मस्यरूपंचशत्रुभयकार्यतिहारिकुत्र॥ चित्तेकृपासमरनि
ष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि॥ २१॥ त्रैलो
क्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्द्धनि
तेपिहत्वा॥ नीतादिवंरिपुगणाभयमप्यपास्तमस्माक
मुन्मदसुरारिभवंनमस्ते॥ २२॥ शूलेनपाहिनोदेविपा राम॰
हिखड्गेनचांबिके॥ घंटास्वनेननःपाहिचापज्यानिः २१
स्वनेनच॥ २३॥ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे॥

भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरि॥ २४॥ सौम्या
नियानिरूपाणित्रैलोक्येविचरंतिते॥ यानिचात्यर्थ
घोराणितैरक्षास्मांस्तथाभुवं॥ २५॥ खड्गशूलगदादीनि
यानिचास्त्राणितेंबिके॥ करपल्लवसंगीनितैरस्मान्रक्ष
सर्वतः॥ २६॥ ॥ऋषिरुवाच॥ ॥एवंस्तुतासुरैर्दिव्यैःकुसु
मैर्नंदनोद्भवैः॥ अर्चिताजगतांधात्रीतथागंधानुलेपनैः
॥ २७॥ भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता॥ प्राह

ददाम्यहमतिप्रीत्यास्तवैरेभिः सुपूजिता॥२॥

ती ४०

सास्सुमुखी समस्तान्प्रणतान्सुरान्॥२८॥ व्रियतांत्रिद
शाः सर्वैर्यदस्मत्तोभिवांछितं॥ ॥देवा ऊचुः॥ ॥भगवत्या
कृतं सर्वं न किंचिदवशिष्यते॥२९॥ यदयं निहतः शत्रुर
स्माकं महिषासुरः॥३०॥ यदि चापि वरो देयस्त्वयास्मा
कं महेश्वरि॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमाप राम॰
दः॥३१॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने॥ ४०
तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां॥३२॥ वृद्धयेस्म

त्प्रसन्ना त्वं भवेथाः सर्वदांबिके॥ ॥ऋषिरुवाच॥ ॥
इति प्रसादिता देवैर्जगतोर्थे तथात्मनः॥३३॥ तथेत्यु
क्त्वा भद्रकाली बभूवांतर्हिता नृप॥३४॥ इत्येतत्कथितं
भूप संभूता सा यथा पुरा॥ देवी देवशरीरेभ्यो जगत्त्र
यहितैषिणी॥३५॥ पुनश्च गौरीदेहात्सा समुद्भूता यथा
भवत्॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः॥३६॥
रक्षणाय च लोकानां देवानामुपकारिणी॥ तच्छृणुष्व

सप्त॰ ४१

मयाख्यातंयथावत्कथयामिते ॥ ३७ ॥ ॥ इतिमार्कंडेय
पुराणे॰ शक्रादयस्तुतिः ४ ॥ ऋषिरुवाच ॥ ॥ पुरा
शुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः ॥ त्रैलोक्यंयज्ञ
भागाश्चहृतामदबलाश्रयात ॥ १ ॥ तावेवसूर्यतांतद्व
दधिकारंतथैंदवं ॥ कौबेरमथयाम्यंचचक्रातेवरुण
स्यच ॥ २ ॥ तावेवपवनर्द्धिंचचक्रतुर्वन्हिकर्मच ॥ ततो
देवाविनिर्द्धूताभ्रष्टराज्याःपराजिताः ॥ ३ ॥ हृताधिका

राम॰ ४१

रास्त्रिदशास्ताभ्यांसर्वैर्निराकृताः ॥ महासुराभ्यांतांदेवीं
संस्मरंत्यपराजितां ॥ ४ ॥ तयास्माकंवरोदत्तोयथापत्सु
स्मृताखिलाः ॥ भवतांनाशयिष्यामितत्क्षणात्परमाप
दः ॥ ५ ॥ इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं ॥ जग्मुस्त
त्रततोदेवींविष्णुमायांप्रतुष्टुवुः ॥ ६ ॥ नमोदेव्यैमहा
देव्यैशिवायैसततंनमः ॥ नमःप्रकृत्यैभद्रायैनिय
ताःप्रणताःस्मतां ॥ ७ ॥ रौद्रायैनमोनित्यायैगौर्यैधात्र्यै

॥ देशाऊशुः २

स॰ती
४९

नमोनमः॥ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः॥
८॥कल्याण्यैप्रणतांवृध्यैसिध्यैकुर्मोनमोनमः॥नैर्ऋ
त्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः॥९॥दुर्गायैदुर्ग
पारायैसारायैसर्वकारिण्यै॥ख्यात्यैतथैवकृष्णायैधू
म्रायैसततंनमः॥१०॥अतिसौम्यातिरौद्रायैनतास्तस्यै
नमोनमः॥नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः॥११
यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता॥नमस्तस्यैन

राम॰
४९

मस्तस्यैनमस्तस्यैनमोनमः॥१२॥यादेवी॰चेतनेत्यभि
धीयते॥नमस्तस्यैनमस्तस्यै॰॥१३॥यादेवी॰बुद्धिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥१४॥यादेवी॰निद्रारूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥१५॥यादेवी॰क्षुधारूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥१६॥यादेवी॰छायारूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥१७॥यादेवी॰शक्तिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥१८॥यादेवी॰तृष्णारूपेण

स॰ती ४२

संस्थिता॥नमस्तस्यैनमस्तस्यै॥१९॥यादेवी॰ क्षांतिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२०॥यादेवी॰ जातिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२१॥यादेवी॰ लज्जारूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॥२२॥यादेवी॰ शांतिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२३॥यादेवी॰ श्रद्धारूपेण राम॰
संस्थिता॥ नमस्तस्यैनमस्तस्यै॰॥२४॥यादेवी॰ कांतिरूपेण ४२
संस्थिता॥ नमस्तस्यैनमस्तस्यै॰॥२५॥ यादेवी॰ लक्ष्मीरूपेण

संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२६॥यादेवी॰ वृत्तिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२७॥यादेवी॰ स्मृतिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२८॥यादेवी॰ दयारूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥२९॥यादेवी॰ तुष्टिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥३०॥यादेवी॰ मातृरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥३१॥यादेवी॰ भ्रांतिरूपेण
संस्थिता॥नमस्तस्यैनमस्तस्यै॰॥३२॥इंद्रियाणामधिष्ठात्री

यादे॰ पुष्टि ३१ यादे॰ धृतिरू॰ ३२

स॰ती
४८

भूतानामखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो
नमः ॥ ३३ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत
॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३४ ॥ स्तु
ता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता
॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु
चापदः ॥ ३५ ॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा
च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हंति नः सर्वाप

राम
४८

दो भक्तिविनम्रमूर्तिभिः ॥ ३६ ॥ ॥ ऋषिरुवाच ॥ ॥ एवं
स्तवाभियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्या
ययौ तोये जाह्नव्या नृपनंदन ॥ ३७ ॥ साब्रवीत्तान्सु
रान्सुभ्रूर्भवद्भिः स्तूयते त्र का ॥ शरीरकोशतश्चास्याः
समुद्भूताब्रवीच्छिवा ॥ ३८ ॥ स्तोत्रं ममैतत्क्रियते शुंभ
दैत्यनिराकृतैः ॥ देवैः समेतैः समरे निशुंभेन परा
जितैः ॥ ३९ ॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृतांबि

स०ती ४५

का॥कौशिकीतिसमस्तेषुततोलोकेषुगीयते॥४०॥तस्यां
विनिर्गतायांतुकृष्णाभूत्सापिपार्वती॥कालिकेतिसमा
ख्याताहिमाचलकृताश्रया॥४१॥ततोंबिकापरंरूपंबि
भ्राणासुमनोहरं॥ददर्शचंडोमुंडश्चभृत्यौशुंभनिशुं
भयोः॥४२॥ताभ्यांशुंभायचाख्याताअतीवसुमनोह रामः
रा॥काप्यास्तेस्त्रीमहाराजभासयंतीहिमाचलं॥४३॥नै ४५॥
वतादृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं॥ज्ञायतांकाप्यसौदे

वीगृह्यतांचासुरेश्वर॥४४॥स्त्रीरत्नमतिचार्वंगीद्योत
यंतीदिशस्त्विषा॥सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्ह
ति॥४५॥यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो॥
त्रैलोक्येतुसमस्तानिसांप्रतंतानितेगृहे॥४६॥ऐराव
तःसमानीतोगजरत्नंपुरंदरात्॥पारिजाततरुश्चायं
तथैवोच्चैःश्रवाहयः॥४७॥विमानंहंससंयुक्तमेतत्ति[illegible]
ष्ठतितेंगने॥रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतं॥४८॥

म॰ती निधिरेष महापद्मः समानीतो धनेश्वरात् ॥ किंजल्किनीं
४९ ददौ चाब्धिर्मालामम्लानपंकजां ॥ ४९ ॥ छत्रं ते वारुणं
गेहे कांचनस्रावितिष्ठति ॥ तथायं स्यंदनवरो यः पुरा
सीत्प्रजापतेः ॥ ५० ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्व
या हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ५१ ॥ राम॰
निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निर ४९
पि ददौ तुभ्यमग्निशौचे च वाससी ॥ ५२ ॥ एवं दैत्येंद्र

रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी
त्वया कस्मान्न गृह्यते ॥ ५३ ॥ ॥ ऋषिरुवाच ॥ ॥ निशम्येति
वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्रीवे
दूतं देव्या महासुरं ॥ ५४ ॥ इति चेति च वक्तव्या सा गता
वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया ल
घु ॥ ५५ ॥ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ सा
देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ५६ ॥ दूत उवाच ॥

स.ती ९ देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्वरः॥दूतोहंप्रेषित
स्तेनत्वत्सकाशमिहागतः॥५७॥अव्याहताज्ञःसर्वासु
यःसदादेवयोनिषु॥निर्जिताखिलदैत्यारिःसयदाहशृ
णुष्वतत्॥५८॥ममत्रैलोक्यमखिलंममदेवावशानु
गाः॥यज्ञभागानहंसर्वानुपाश्नामिपृथक्पृथक्॥ रामः
५९॥त्रैलोक्येवररत्नानिममवश्यान्यशेषतः॥तथै २०
वगजरत्नानिहृत्वादेवेंद्रवाहनं॥६०॥क्षीरोदमथ

नोद्भूतमश्वरत्नंममामरैः॥उच्चैःश्रवससंज्ञंतत्प्रणि
पत्यसमर्पितं॥६१॥यानिचान्यानिदेवेषुगंधर्वेषूरगे
षुच॥रत्नभूतानिभूतानितानिमय्येवशोभने॥६२॥
स्त्रीरत्नभूतांत्वांदेविलोकेमन्यामहेवयं॥सात्वमस्मा
नुपागच्छयतोरत्नभुजोवयं॥६३॥मांवाममानुजंवा
पिनिशुंभमुरुविक्रमं॥भजत्वंचंचलापांगिरत्नभूता
सिवैयतः॥६४॥परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्रहात्।

एतद्बुध्वासमालोच्यमत्परिग्रहतांव्रज॥६५॥ ॥ऋषि
रुवाच॥ ॥इत्युक्तासातदादेवीगंभीरांतस्मिताजगौ॥
दुर्गाभगवतीभद्राययेदंधार्यतेजगत॥६६॥ ॥देव्यु
वाच॥ ॥सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्वयोदितं॥
त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापिताद्दशः॥६७॥
किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं॥श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा॥६८॥योमांजयति

संग्रामेयोमेदर्पंव्यपोहति॥योमेप्रतिबलोलोकेसमे
भर्त्ताभविष्यति॥६९॥तदागच्छतुशुंभोत्रनिशुंभोवाम
हासुरः॥मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु॥
७०॥ ॥दूतउवाच॥ ॥अवलिप्तासिमैवंत्वंदेविब्रूहि
ममाग्रतः॥त्रैलोक्ये कःपुमांस्तिष्ठेदग्रेशुंभनिशुंभ
योः॥७१॥अन्येषामपिदैत्यानांसर्वेदेवानवैयुधितिष्ठंतिसंमुखे देविकिंपुनस्त्रीत्वमेकिका॥७२॥इंद्रा

म०ती
४९

याःसकलादेवास्तस्थुर्येषांनसंयुगे॥शुंभादीनांकथंते
षांस्त्रीप्रयास्यसिसंमुखं॥७३॥सात्वंगछमयैवोक्तापार्श्वं
शुंभनिशुंभयोः॥केशाकर्षणनिर्धूतगौरवामागमिष्यसि॥
७४॥ ॥देव्युवाच॥ ॥एवमेतद्बलीशुंभोनिशुंभश्चातिवी
र्यवान्॥किंकरोमिप्रतिज्ञामेयदनालोचितापुरा॥७५॥ रामः
सत्वंगछमयैवोक्तंयदेतत्सर्वमादृतः॥तदाचक्ष्वासुरेंद्र ४९
यसचयुक्तंकरोतुयत्॥७६॥ ॥इतिमार्कंडेयपुराणे॰

देव्यादूतसंवादः ५ ॥ऋषिरुवाच॥ ॥इत्याकर्ण्यवचो
देव्याःसदूतोमर्षपूरितः॥समाचष्टसमागम्यदैत्यराजा
यविस्तरात्॥१॥तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्
ततः॥सक्रोधःप्राहदैत्यानामधिपंधूम्रलोचनं॥२॥हे
धूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः॥तामानयबला
द्दुष्टांकेशाकर्षणविह्वलां॥३॥तत्परित्राणदःकश्चिद्यदि
वोत्तिष्ठतेपरः॥सहंतव्योमरोवापियक्षोगंधर्वएववा॥४॥

स.ती ॥ ॥ ऋषिरुवाच ॥ ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोच
५० नः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ५ ॥ स दृष्ट्वा
तां ततो देवीं तुहिनाचलसंस्थितां ॥ जगादोच्चैः प्रयाहीति मू
लं शुंभनिशुंभयोः ॥ ६ ॥ न चेत्प्रीत्याद्य भवती मद्भर्तारमु
पैष्यति ॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलां ॥ ७ ॥ ॥ राम
देव्युवाच ॥ ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥ ॥ ब ५०
लान्नयसि मामेवं ततः किं ते करोम्यहं ॥ ८ ॥ ॥ ऋषिरुवाच ॥

इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलोचनः ॥ हूंकारेणैव
तं भस्म सा चकारांबिका ततः ॥ ९ ॥ अथ क्रुद्धं महासैन्यम
सुराणां तथांबिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपर
श्वधैः ॥ १० ॥ ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं ॥
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ ११ ॥ कांश्चित्क
रप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रांत्या चाधरेणा
न्यान्स जघान महासुरान् ॥ १२ ॥ केषांचित्पाटयामास न

सं.ती
५१

वि: कोपाद्ध्वनि केसरी ॥ तथा तल प्रहारेण शिरांसि कृतवा
न्पृथक् ॥ १३ ॥ विछिन्न बाहु शिरस: कृतास्तेन तथापरे ॥ प
पौ च रुधिरं कोपादन्येषां धुतकेसर: ॥ १४ ॥ क्षणेन तद्बलं
सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा देव्या वाहनेना
तिकोपिना ॥ १५ ॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोच
नं ॥ बलं च क्षयितं कृत्स्नं देवी केसरिणा तत: ॥ १६ ॥ चु
कोप दैत्याधिपति: शुंभ: प्रस्फुरिताधर: ॥ आज्ञापया

राम:
५१

मास च तौ चंडमुंडौ महासुरौ ॥ १७ ॥ हे चंड हे मुंड बलै
र्बहुभि: परिवारितौ ॥ तत्र गछत गत्वा च सा समानीय
तां लघु ॥ १८ ॥ केशेष्वाकृष्य बद्ध्वा वा यदि व: संशयो यु
धि ॥ तदाशेषायुधै: सर्वैरसुरैर्विनिहन्यतां ॥ १९ ॥ तस्यां
हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां
बद्ध्वा गृहीत्वा तामथांबिकां ॥ २० ॥ ॥ इति मार्कंडेयपुरा
णे ॰ धूम्रलोचनवध: ६ ॥ रुधिर नाम ॥ ॥ आज्ञ

स॰ती ५२ ज्ञास्ते ततो दैत्याश्चंडमुंडपुरोगमाः॥ चतुरंगबलोपेताय

युरभ्युद्यतायुधाः॥२॥ ददृशुस्ते ततो देवीमीषद्धासांव्यव

स्थितां॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने॥३॥ ते दृ

ष्वातां समादातुमुद्यमं चक्रुरुद्यताः॥ आकृष्टचापासि

धरास्तथान्ये तत्समीपगाः॥४॥ ततः कोपं चकारोच्चैरंबि रामः

काता नरीन्प्रति॥ कोपेन चास्या वदनं मसीवर्णमभूत्तदा ५२

॥५॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं॥ काली करा

लवदना विनिष्क्रांतासिपाशिनी॥६॥ विचित्रखट्वांगधरा

नरमालाविभूषणा॥ द्वीपिचर्मपरीधाना शुष्कमांसातिभै

रवा॥७॥ अतिविस्तारवदना जिह्वाललनभीषणा॥ निम

ग्नारक्तनयना नादापूरितदिङ्मुखा॥८॥ सा वेगेनाभिपति

ता घातयंती महासुरान्॥ सैन्ये तत्र सुरारीणामभक्षयतत

द्बलं॥९॥ पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान्॥ स

मादायैकहस्तेन मुखे चिक्षेप वारणान्॥१०॥ तथैव योधं तु

स॰ती
५२

रथैरथं सारथिनासह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यति
भैरवं ॥ १० ॥ एकं जग्राह केशेषु ग्रीवायामथचापरं ॥ पादे
नाक्रम्यचैवान्यमुरसान्यमपोथयत ॥ ११ ॥ तैर्मुक्तानि
च शस्त्राणि महास्त्राणि तथासुरैः ॥ मुखेन जग्राह रुषा
दशनैर्मथितान्यपि ॥ १२ ॥ बलिनां तद्बलं सर्वमसुराणां
दुरात्मनां ॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥
१३ ॥ असिना निहताः केचित्केचित्खट्वांगताडिताः ॥ जग्मु

राम॰
५२

र्विनाशमसुरा दंताग्राभिहतास्तथा ॥ १४ ॥ क्षणेन तद्बलं
सर्वमसुराणां निपातितं ॥ दृष्ट्वा चंडोभिदुद्राव तां कालीम
तिभीषणां ॥ १५ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः
॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः ॥ १६ ॥ तानि
चक्राण्यनेकानि विशमानानि तन्मुखं ॥ बभुर्यथार्कविं
बानि सुबहूनि घनोदरं ॥ १७ ॥ ततो जहासातिरुषा भीमं
भैरवनादिनी ॥ काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला ॥ १८

स॰ती ५४ उत्थाय च महासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशे
षु शिरस्तेनासिनाछिनत ॥ २०॥ अथ मुंडोऽभ्यधावत्तां दृष्ट्वा
चंडं निपातितं ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१
हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं ॥ मुंडं च सुमहा
वीर्यं दिशो भेजे भयातुरं ॥ २२॥ शिरश्चंडस्य काली च गृ राम॥
हीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडि ५४
कां ॥ २३॥ मया तवात्रोपहृतौ चंडमुंडौ महापशू ॥ युद्धय

ज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि ॥ २४॥ ॥ ऋषिरु॰ ॥
तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ ॥ उवाच कालीं क
ल्याणी ललितं चंडिका वचः ॥ २५॥ यस्माच्चंडं च मुंडं च
गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो लोके ख्याता देवी
भविष्यसि ॥ २६॥ ॥ इति मार्कंडेयपुराणे ॰ चंडमुंडव
धः ७ ॥ ऋषिरुवाच ॥ चंडे च निहते दैत्ये मुंडे च वि
निपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ १॥

स०ती
५५

ततः कोपपराधीनचेताः शुंभः प्रतापवान्॥ उद्योगं सर्वसै
न्यानां दैत्यानामादिदेश ह॥२॥ अद्य सर्वबलैर्दैत्याः षड
शीतिरुदायुधाः॥ कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः
॥३॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै॥ शतं कु
लानि धौम्राणां निर्गछंतु ममाज्ञया॥४॥ कालका दौर्हृदा सप्त॰
मौर्याः कालिकेयास्तथासुराः॥ युद्धाय सज्जा निर्यांतु ५५
आज्ञया त्वरिता मम॥५॥ इत्याज्ञाप्यासुरपतिः शुंभो भैर

वशासनः॥ निर्जगाम महासैन्यः सहस्त्रैर्बहुभिर्वृतः॥६॥
आयातं चंडिका दृष्वा तत्सैन्यमतिभीषणं॥ ज्यास्वनैः पूर
यामास धरणीगगनांतरं॥७॥ ततः सिंहो महानादमतीव
कृतवान्नृप॥ घंटास्वनेन तान्नादानंबिका चोपबृंहयत
॥८॥ धनुर्ज्यासिंहघंटानां शब्दापूरितदिङ्मुखा॥ निना
दैर्भीषणैः काली जिग्ये विस्तारितानना॥९॥ तं निनादमु
पश्रुत्य दैत्यसैन्यैश्चतुर्दिशं॥ देवी सिंहस्तथा काली सरो

स॰ती ५९

यैः परिवारितः ॥१०॥ एतस्मिन्नंतरे भूप विनाशाय सुर
द्विषां ॥ भवायामरसिंहानामतिवीर्यबलान्विताः ॥११॥ ब्र
ह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः ॥ शरीरेभ्यो विनि
ष्क्रम्य तद्रूपैश्चंडिकां ययुः ॥१२॥ यस्य देवस्य यद्रूपं
यथाभूषणवाहनं ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमा रामः ५९
ययौ ॥१३॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥१४॥ मा

हेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवलया
प्राप्ता चंद्ररेखाविभूषणा ॥१५॥ कौमारी शक्तिहस्ता च
मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानंबिका गुह
रूपिणी ॥१६॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥
शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१७॥ यज्ञवा
राहमतुलं रूपं या बिभ्रती हरेः ॥ शक्तिः साप्याययौ तत्र
वाराहीं बिभ्रती तनुं ॥१८॥ नारसिंही नृसिंहस्य बिभ्रती

स॰ती
५७

सदृशंवपुः॥प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः
॥१९॥वज्रहस्तातथैवैंद्रीगजराजोपरिस्थिता॥प्राप्ता
सहस्रनयनायथा।शक्रस्तथैवसा॥२०॥ततःपरिवृत
स्ताभिरीशानोदेवशक्तिभिः॥हन्यंतामसुराःशीघ्रंमम
प्रीत्याहचंडिकां॥२१॥ततोदेवीशरीरात्तुविनिष्क्रांतातिभी राम४०
षणा॥चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी॥२२॥ ५७
साचाहधूम्रजटिलमीशानमपराजिता॥दूतत्वंगछ

भगवान्पार्श्वंशुंभनिशुंभयोः॥२३॥ब्रूहिशुंभंनिशुंभंच
दानवावतिगर्वितौ॥येचान्येदानवास्तत्रयुद्धाय
समुपस्थिताः॥२४॥त्रैलोक्यमिंद्रोलभतांदेवाःसं
तुहविर्भुजः॥यूयंप्रयातपातालंयदिजीवितुमिछ
थ॥२५॥बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः॥
तदागछततृप्यंतुमच्छिवाःपिशितेनवः॥२६॥यतोनि
युक्तोदौत्येनतयादेव्याशिवःस्वयं॥शिवदूतीतिलोके

स॰ती ५८ स्मिंस्ततः साख्यातिमागता॥२७॥ तेपिश्रुत्वा वचोदेव्याः
शर्वाख्यातं महासुराः॥ अमर्षापूरिता जग्मुर्यत्र कात्याय
नी स्थिता॥२८॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टि
भिः॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः॥२९॥ सा च
तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान्॥ चिच्छेद ली राम॰
लयाध्मातधनुर्मुक्तैर्महेषुभिः॥३०॥ तस्याग्रतस्तथा का ५८
ली शूलपातविदारितान्॥ खट्वांगपोथितांश्चारीन्कुर्वती

व्यचरत्तदा॥३१॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः॥
ब्रह्माणी चाकरोच्छत्रून्येनयेन स्म धावति॥३२॥ मा
हेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी॥ दैत्याञ्जघा
न कौमारी तथा शक्त्यातिकोपना॥३३॥ ऐंद्रीकुलिशपा
तेन शतशो दैत्यदानवाः॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौ
घप्रवर्षिणः॥३४॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतव
क्षसः॥ वाराहमूर्त्यान्यपतंश्चक्रेण च विदारिताः॥३५॥

स॰ती॰ नखैर्विदारितांश्चान्यान् भक्षयंती महासुरान् ॥ नारसिंही
५९ चचाराजौ नादाक्षिप्ततदिङ्मुखा ॥ ३६ ॥ चंडाट्टहासैरसुराः
शिवदूत्याभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्चखादाथ
ट सा तदा ॥ ३७ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३८ ॥ प रामः
लायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्या ५९
ययौ क्रुद्धो रक्तबीजो महासुरः ॥ ३९ ॥ रक्तबिंदुर्यदा भूमौ

पतत्यस्य शरीरतः ॥ समुत्पतति मेदिन्यां तत्प्रमाणो म
हासुरः ॥ ४० ॥ युयुधे स गदापाणिरिंद्रशक्त्या महासु
रः ॥ ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत ॥ ४१ ॥ कुलि
शेनाहतस्याशु बहु सुस्राव शोणितं ॥ समुत्तस्थुस्ततो
योधास्तद्रूपास्तत्पराक्रमाः ॥ ४२ ॥ यावंतः पतितास्तस्य
शरीराद्रक्तबिंदवः ॥ तावंतः पुरुषा जातास्तद्वीर्यबल
विक्रमाः ॥ ४३ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥

स॰ती समं मातृभिरत्युग्रशस्त्रपातातिपीडितः ॥ ४४ ॥ पुनश्च व
६ ज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जा
ताः सहस्रशः ॥ ४५ ॥ वैष्णवी समरे चैनं चक्रेणाभिजघा
न ह ॥ गदया ताडयामास ऐंद्री तमसुरेश्वरं ॥ ४६ ॥ वैष्ण राम॰
वीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥ सहस्रशो जगद्व्या ॥ ६० ॥
प्तं तत्प्रमाणैर्महासुरैः ॥ ४७ ॥ शक्त्या जघान कौमारी वारा
ही च तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं महासुरं ४८

स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥ मातृः कोपस
माविष्टो रक्तबीजो महासुरः ॥ ४९ ॥ तस्याहतस्य बहुधा
शक्तिशूलादिभिर्भुवि ॥ पपात यो वै रक्तौघस्तेनासंछ
तशो सुराः ॥ ५० ॥ तैश्चासुरासृक्संभूतैरसुरैः सकलं
जगत ॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं ॥ ५१ ॥
तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा ॥ उवाच का
लीं चामुंडे विस्तीर्णं वदनं कुरु ॥ ५२ ॥ मच्छस्त्रपातसंभूतान्

स॰ती
६१

रक्तबिंदून्महासुरान् ॥ रक्तबिंदोः प्रतीछत्वं वक्रेणानेन वे
गिता ॥ ५३ ॥ भक्षयंतीच्चररणेतदुत्पन्नान्महासुरान् ॥ एव
मेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५४ ॥ भक्ष्यमाणा
स्त्वया चोग्रा न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा तां ततो देवी
शूलेनाभिजघान तं ॥ ५५ ॥ मुखेन काली जगृहे रक्तबी राम:
जस्य शोणितं ॥ ततोसावाजघानाथ गदया तत्र चंडिकां ॥ ६१
५६ ॥ न चास्या वेदनां चक्रे गदापातोल्पिकामपि ॥ तस्याह

तस्य देहात्तु बहु सुस्राव शोणितं ॥ ५७ ॥ यतस्ततस्तद्वक्त्रेण
चामुंडा संप्रतीछति ॥ मुखे समुद्गता ये स्या रक्तपातान्महा
सुराः ॥ ५८ ॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं ॥
देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः ॥ ५९ ॥ जघा
न रक्तबीजं तं चामुंडापीतशोणितं ॥ स पपात महीपृष्ठे श
स्त्रसंघसमाहतः ॥ ६० ॥ नीरक्तश्च महीपाल रक्तबीजो म
हासुरः ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ ६१ ॥ तेषां

।सप्त
६२

मातृगणोजातोनन्नर्तास्तन्मदोद्धतः॥६२॥ ॥इतिमार्कं
डेयपुराणे॰ रक्तबीजवधः॥ ८ ॥ ॥राजोवाच॥ ॥
विचित्रमिदमाख्यातंभगवन्भवताममः॥देव्याश्चरितमा
हात्म्यंरक्तबीजवधाश्रितं॥१॥भूयश्चेच्छाम्यहंश्रोतुंरक्त
बीजेनिपातिते॥चकारशुंभोयत्कर्मनिशुंभश्चातिकोप
नः॥२॥ ॥ऋषिरुवाच॥ ॥चकारकोपमतुलंरक्तबीजेनि ६२
पातिते॥शुंभासुरोनिशुंभश्चहतेष्वन्येषुचाहवे॥३॥हन्य

मानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥अभ्यधावन्नि
शुंभोथमुख्ययासुरसेनया॥४॥तस्याग्रतस्तथापृष्ठे
पार्श्वयोश्चमहासुराः॥संदष्टौष्ठपुटाःक्रुद्धाहंतुंदेवी
मुपाययुः॥५॥आजगाममहावीर्यःशुंभोपिस्वबलैर्वृ
तः॥निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः॥६॥
ततोयुद्धमतीवासीद्देव्याःशुंभनिशुंभयोः॥शरवर्षमती
वोग्रंमेघयोरिववर्षतोः॥७॥चिच्छेदास्तांछरांस्ताभ्यांचं

स॰ती ६३

डिकास्वशरोत्करैः॥ताडयामासचांगेषुशस्त्रौघैरसु
रेश्वरौ॥८॥निशुंभोनिशितंखड्गंचर्मचादायसुप्रभं॥
अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमं॥९॥ताडितेवा
हनेदेवीक्षुरप्रेणासिमुत्तमं॥निशुंभस्याशुचिच्छेदचर्म
चाप्यष्टचंद्रकं॥१०॥छिन्नेचर्मणिखड्गेचशक्तिंचिक्षे राम॰
पसोसुरः॥तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखाग ६३
तां॥११॥कोपाध्मातोनिशुंभोथशूलंजग्राहदानवः॥आ

यांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत॥१२॥आवि
ध्याथगदांसोपिचिक्षेपचंडिकांप्रति॥सापिदेव्यात्रि
शूलेनभिन्नाभस्मत्वमागता॥१३॥ततःपरशुहस्तंत
मायांतंदैत्यपुंगवं॥आहत्यदेवीबाणौघैरपातयत
भूतले॥१४॥तस्मिन्निपतितेभूमौनिशुंभेभीमविक्र
मे॥भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां॥१५॥सरथ
स्थस्तथात्युच्चैर्गृहीतपरमायुधैः॥भुजैरष्टाभिरतुलैर्व्या

सं॰ती ६४ प्याशेषंवभौनभः॥१६॥तमायांतंसमालोक्यदेवीशंख

मवादयत॥ज्याशब्दंचापिधनुषश्चकारातीवदुःसहं॥

१७॥पूरयामासककुभोनिजघंटास्वनेनच॥समस्त

दैत्यसैन्यानांतेजोवधविधायिना॥१८॥ततःसिंहोम

हानादैस्त्याजितेभमहामदैः॥पूरयामासगगनंगांत रामः ६४

शेव थोपदिशोदश॥१९॥ततःकालीसमुत्पत्यगगनंक्ष्मांम

ताडयत॥कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः॥२०॥

अट्टाट्टहासमशिवंशिवदूतीचकारह॥तैःशब्दैरसुरास्त्रे

सुःशुंभःकोपंपरंययौ॥२१॥दुरात्मंस्तिष्ठतिष्ठेतिव्या

जहारांबिकायदा॥तदाजयेत्यभिहितंदेवैराकाशसं

स्थितैः॥२२॥शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा

॥आयांतीवह्निकूटाभासानिरस्तामहोल्कया॥२३॥सिंह

नादेनशुंभस्यव्याप्तंलोकत्रयांतरं॥निर्घातनिःस्वनोघो

रोजितवानवनीपते॥२४॥शुंभमुक्तान्छरान्देवीशुंभस्त

स॰ती
६५

सहितान्छरान्॥चिच्छेदस्वशरैरुग्रैः शतशोथसहस्रशः॥२५॥
ततः सा चंडिका क्रुद्धा शूलेनाभिजघानतं॥स तदाभिहतो
भूमौ मूर्छितो निपपात ह॥२६॥ततो निशुंभः संप्राप्य चेतना
मात्तकार्मुकः॥आजघान शरैर्देवीं कालीं केसरिणं तथा॥२७॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः॥चक्रायुधेन दिति राम॰
जश्छादयामास चंडिकां॥२८॥ततो भगवती क्रुद्धा दुर्गा दुर्गा ६५
र्तिनाशिनी॥चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान्॥२९॥

ततो निशुंभो वेगेन गदामादाय चंडिकां॥अभ्यधावत वै हंतुं
दैत्यसेनासमावृतः॥३०॥तस्यापतत एवाशु गदां चिच्छेद चं
डिका॥खड्गेन शितधारेण स च शूलं समाददे॥३१॥शूलह
स्तं समायांतं निशुंभममरार्दनं॥हृदि विव्याध शूलेन वेगावि
द्धेन चंडिका॥३२॥भिन्नस्य तस्य शूलेन हृदयान्निःसृतोपरः
॥महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन्॥३३॥तस्य निष्क्रा
मतो देवी प्रहस्य स्वनवत्ततः॥शिरश्चिच्छेद खड्गेन ततोसावप

स॰ती
६६

तद्भुवि॥ ३४॥ ततः सिंहश्चखादोग्रंदंष्ट्राक्षुण्णशिरोधरान्॥
असुरांस्तांस्तथा काली शिवदूती तथा परान्॥ ३५॥ कौमा
रीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः॥ ब्रह्माणीमंत्रपू
तेन तोयेनान्येनिराकृताः॥ ३६॥ माहेश्वरीत्रिशूलेन भि
न्नाः पेतुस्तथापरे॥ वाराहीतुंडघातेन केचिच्चूर्णीकृता भु राम॰
वि॥ ३७॥ खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः॥ वज्रे ६६
पा चैंद्रीहस्ताग्रविमुक्तेन तथा परे॥ ३८॥ केचिद्विनेशुर

सुराः केचिन्नष्टा महाहवात्॥ भक्षिताश्चापरे काली शिव
दूतीमृगाधिपैः॥ ३९॥ ॥ इति मार्कंडेयपुराणे निशुंभवधः
॥ ॥ ९॥ ॥ ऋषिरुवाच॥ ॥ निशुंभं निहतं दृष्ट्वा भ्रातरं प्राण
संमितं॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः॥ १॥ ब
लावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह॥ अन्यासां बलमा
श्रित्य युध्यसे यातिमानिनी॥ २॥ ॥ देव्युवाच॥ ॥ एकैवा
हं जगत्यत्र द्वितीया का ममापरा॥ पश्यैता दुष्ट मय्येव वि

स॰ती ॥६७॥ शंत्योमद्विभूतयः॥३॥ततः समस्तास्तादेव्यो ब्रह्माणीप्रमुखा
लयंतस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका॥४॥ ॥दे
व्युवाच॥ ॥अहंविभूत्याबहुभिरिहरूपैर्यदास्थिता॥तत्संहृ
तंमयैकैवतिष्ठाम्याजौस्थिरोभव॥५॥ ॥ऋषिरुवाच॥ ॥
ततःप्रववृतेयुद्धंदेव्याःशुंभस्यचोभयोः॥पश्यतांसर्वदेवा राम॥ ६७
नामसुराणांचदारुणं॥६॥शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चै
वदारुणैः॥तयोर्युद्धमभूद्भूयःसर्वलोकभयंकरं॥७॥दि

व्यान्यस्त्राणिशतशोमुमुचेयान्यथांबिका॥बभंजतानि
दैत्येंद्रस्तत्प्रतीघातकर्तृभिः॥८॥मुक्तानितेनचास्त्राणि
दिव्यानिपरमेश्वरी॥बभंजलीलयैवोग्रहुंकारोच्चारणा
दिभिः॥९॥ततःशरशतैर्देवीमाछादयतसोसुरः॥सापित
त्कुपितादेवीधनुश्चिच्छेदचेषुभिः॥१०॥छिन्नेधनुषिदैत्यें
द्रस्तथाशक्तिमथाददे॥चिछेददेवीचक्रेणतामप्यस्यक
रेस्थितां॥११॥ततःखड्गमुपादायशतचंद्रंचभानुमत॥

स॰ती
६८

अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥२॥ तस्याप
तत एवाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्च
र्मचार्ककरामलं ॥३॥ हताश्वः स तदा दैत्यश्छिन्नधन्वावि
सारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥४॥ चि
च्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सोऽभ्यधाव
त्तां मुष्टिमुद्यम्य वेगवान् ॥५॥ स मुष्टिं पातयामास हृद
येदैत्यपुंगवः ॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत ॥

रामः
६८

६॥ तलप्रहाराभिहतो निपपात महीतले ॥ स दैत्यराजः
सहसा पुनरेव तथोत्थितः ॥७॥ उत्पत्य च प्रगृह्योच्चैर्देवीं
गगनमास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चंडिका
॥८॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परं ॥ चक्रतुः प्रथ
मं सिद्धमुनिविस्मयकारकं ॥९॥ ततो नियुद्धं सुचिरं कृत्वा
तेनांबिका सह ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥१०॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्यधावत दु

स॰ती ६९ ष्टात्माचंडिकानिधनेछया॥२६॥तमायांतंततोदेवीसर्वदै
त्यजनेश्वरं॥जगत्यांपातयामासभित्वाशूलेनवक्षसि॥२७॥
सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षितः॥चालयन्सक
लांपृथ्वींसाब्धिद्वीपांसपर्वतां॥२८॥ततःप्रसन्नमखिलंह
तेतस्मिन्दुरात्मनि॥जगत्स्वास्थ्यमतीवापनिर्मलंचाभव सप्त॰
न्नभः॥२९॥उत्पातमेघाःसोल्कायेप्रागासंस्तेशमंययुः॥ ६०
सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते॥३०॥ततोदेवगणाः

सर्वेहर्षनिर्भरमानसाः॥बभूवुर्निहतेतस्मिन्गंधर्वाललि
तंजगुः॥३१॥अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः
॥ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः॥३२॥जज्व
लुश्चाग्नयःशांताःशांतादिग्जनितःस्वनाः॥३३॥ ॥इति
मार्कंडेयपुराणेशुंभवधः॥ १० ॥ऋषिरुवाच॥ ॥दे
व्याहतेतत्रमहासुरेंद्रेसेंद्राःसुरावह्निपुरोगमास्तां॥का
त्यायनींतुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः॥१॥देवाऊचुः

स०ती
७०

देविप्रपन्नार्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य॥प्रसी
दविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचराचरस्य॥२॥
आधारभूताजगतस्त्वमेकामहीस्वरूपेणयतस्स्थितासि॥
आपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्यवी
र्ये॥३॥त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यवीजंपरमासि
माया॥संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्नाभुविमुक्ति रामः १०
हेतुः॥४॥विद्याःसमस्तास्तवदेविभेदास्त्रियःसमस्ताःस

कलाजगत्सु॥त्वयैकयापूरितमंबयैतत्कातेस्तुतिस्तव्य
परापरोक्तिः॥५॥सर्वभूतायदादेवीस्वर्गमुक्तिप्रदाय
नी॥त्वंस्तुतास्तुतयेकावाभवंतुपरमोक्तयः॥६॥सर्वस्य
बुद्धिरूपेणाजनस्यहृदिसंस्थिते॥स्वर्गापवर्गदेदेवि
नारायणिनमोस्तुते॥७॥कलाकाष्ठादिरूपेणापरिणा
मप्रदायिनि॥विश्वस्योपरतौशक्तेना०॥८॥सर्वमंगल
मंगल्येशिवेसर्वार्थसाधके॥शरण्येत्र्यंबकेगौरिना० ९॥

स॰ती ७२ सृष्टिस्थितिविनाशानांशक्तिभूते सनातनि॥ गुणाश्रये गु
णमये ना॰॥१०॥ शरणागतदीनार्त्तपरित्राणपरायणे॥
सर्वस्यार्त्तिहरे देवि ना॰॥११॥ हंसयुक्तविमानस्थे ब्रह्मा
णीरूपधारिणि॥ कौशांभःक्षरिके देवि ना॰॥१२॥ त्रिशूल
चंद्राहिधरे महावृषभवाहिनि॥ माहेश्वरीस्वरूपेण ना॰ राम॰
॥१३॥ मयूरकुक्कुटवृते महाशक्तिधरेनघे॥ कौमारीरूप ७१
संस्थाने ना॰॥१४॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे॥

प्रसीद वैष्णवीरूपे ना॰॥१५॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृत
वसुंधरे॥ वराहरूपिणि शिवे ना॰॥१६॥ नृसिंहरूपेणोग्रे
ण हंतुं दैत्यान्कृतोद्यमे॥ त्रैलोक्यत्राणसहिते ना॰॥१७॥
किरीटिनि महावज्रे सहस्रनयनोज्वले॥ वृत्रप्राणहरे
चैंद्रि ना॰॥१८॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले॥
घोररूपे महारावे ना॰॥१९॥ दंष्ट्राकरालवदने शिरोमाला
विभूषणे॥ चामुंडे मुंडमथने ना॰॥२०॥ लक्ष्मि लज्जे महा

स॰ती
७२

विद्येश्रद्धे पुष्टिस्वधे ध्रुवे।।महारात्रिमहामायेनारा०।।२१।।
मेधेसरस्वतिवरेभूतिबाभ्रवितामसि।।नियतेत्वंप्रसीदे
शेना०।।२२।।सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते।।भ
येभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते।।२३।।एतत्तेवदनं
सौम्यंलोचनत्रयभूषितं।।पातुनःसर्वभीतिभ्यःकात्या राम॰
यनिनमोस्तुते।।२४।।ज्वालाकरालमत्युग्रमशेषासुर ७२
सूदनं।।त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते।।२५।।

हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत्।।साघंटापातुनो
देविपापेभ्योनःसुतानिव।।२६।।असुरासृग्वसापंकचर्चि
तस्तेकरोज्वलः।।शुभायखड्गोभवतुचंडिकेत्वांनतावयं।।२७
।।रोगानशेषानपहंसितुष्टारुष्टातुकामान्सकलानभीष्टा
न्।।त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतां
प्रयांति।।२८।।एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविम
हासुराणां।।रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वांबिकेतत्प्रकरो

स॰ती ७३ ति कान्या ॥२९॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु
च का त्वदन्या ॥ ममत्वगर्तेतिमहांधकारे विभ्रामयत्येतद
तीव विश्वं ॥३०॥ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो द
स्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता
त्वं परिपासि विश्वं ॥३१॥ विश्वेश्वरि त्वं परिपासि विश्वं राम॰ ७३
विश्वात्मिका धारयसीति विश्वं ॥ विश्वेशवंद्या भवती भवं
ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३२॥ देवि प्रसीद परि

पालय नोरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥ पा
पानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महो
पसर्गान् ॥३३॥ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि
॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३४॥ ॥देव्यु
वाच ॥ ॥वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं
प्रयच्छामि जगतामुपकारकं ॥३५॥ ॥देवा ऊचुः॥ ॥सर्व
बाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेतन्त्वयाका

स०ती
७४

र्थ्यमस्मद्वैरिविनाशनं॥ ३८॥ ॥देव्युवाच॥ ॥वैवस्वतेंतरे
प्राप्तेअष्टाविंशतिमेयुगे॥शुंभोनिशुंभश्चैवान्यावुत्पत्स्येते
महासुरौ॥ ३९॥नंदगोपगृहेजातायशोदागर्भसंभवा॥
ततस्तौनाशयिष्यामिविंध्याचलनिवासिनी॥ ४०॥पुनर
प्यतिरौद्रेणरूपेणपृथिवीतले॥अवतीर्यहनिष्यामिवैप्र
चित्तांस्तुदानवान्॥ ४१॥भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्म रा न०
हासुरान्॥रक्तादंताभविष्यंतिदाडिमीकुसुमोपमाः॥ ४२॥ ७४

ततोमांदेवताःस्वर्गेमर्त्यलोकेचमानवाः॥स्तुवंतोव्या
हरिष्यंतिसततंरक्तदंतिका॥ ४३॥भूयश्चशतवार्षिक्या
मनावृष्ट्यामनंभसि॥मुनिभिःसंस्तुताभूमौसंभविष्या
म्ययोनिजा॥ ४४॥ततःशतेननेत्राणांनिरीक्षिष्यामि
यन्मुनीन्॥कीर्त्तयिष्यंतिमनुजाःशताक्षीमितिमांततः
॥ ४५॥ततोहमखिलंलोकमात्मदेहसमुद्भवैः॥भरिष्या
मिसुराःशाकैरावृष्टेःप्राणधारकैः॥ ४६॥शाकंभरीतिवि

स॰ती ७५

ख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि दुर्गं
माख्यं महासुरं ॥ ४५ ॥ दुर्गादेवीति विख्यातं तन्मे नाम भ
विष्यति ॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ ४६ ॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ तदा मां मु
नयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ ४७ ॥ भीमादेवीति विख्या राम॰
तं तन्मे नाम भविष्यति ॥ यदारुणाख्यस्त्रैलोक्ये महाबा ७५
धां करिष्यति ॥ ४८ ॥ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं ॥

त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ॥ ४९ ॥ भ्रा
मरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बा
धा दानवोत्था भविष्यति ॥ ५० ॥ तदा तदावतीर्याहं करिष्या
म्यरिसंक्षयं ॥ ५१ ॥ ॥ इति मार्कंडेयपुराणे ॰ नारायणी
स्तुतिः ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ एभिः स्तवैश्च मां नित्यं स्तो
ष्यते यः समाहितः ॥ तस्याहं सकलां बाधां शमयिष्याम्य
संशयं ॥ १ ॥ मधुकैटभनाशं च महिषासुरघातनं ॥ कीर्त्ति

स.ती ७९ यिष्यंति ये तद्वधं शुंभनिशुंभयोः ॥२॥ अष्टम्यां च
चतुर्दश्यां नवम्यां चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या
मम माहात्म्यमुत्तमं ॥३॥ न तेषां दुष्कृतं किंचिद्दुष्कृतो
त्थान चापदः ॥ न विष्यति न दारिद्र्यं न चैवेष्टवियोज रामः ७९
नं ॥४॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न
न शस्त्रानलतोयोघात्कदाचित्संभविष्यति ॥५॥ तस्मा
न्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥ श्रोतव्यं च स

दा भक्त्या परं स्वस्त्ययनं महत् ॥६॥ उपसर्गानशे
षांस्तु महामारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातं
माहात्म्यं शमयेन्मम ॥७॥ यत्रैतत्पठ्यते सम्यङ्नित्य
मायतने मम ॥ सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र
मे स्थितं ॥८॥ बलिप्रदाने पूजायामग्निकार्ये महो
त्सवे ॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥९॥ जा
नताजानता वापि बलिपूजां तथा कृतां ॥ प्रतीच्छिष्या

स.ती ७७ स्यपश्यतीत्याग्निहोमं तथाकृतं ॥१०॥ शरत्काले महापू
जा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा
भक्तिसमन्वितः ॥११॥ सर्वाबाधाविनिर्मुक्तो धनधा
न्यसुतान्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न सं
शयः ॥१२॥ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः राम: ७७
शुभाः ॥ पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥
१३॥ रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ॥ नंदते च

कुलं पुंसां माहात्म्यं मम शृण्वतां ॥१५॥ शां
तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडा
सु चोग्रासु माहात्म्यं शृणुयान्मम ॥१६॥ उपसर्गाः
शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं च नृ
भिर्दृष्टं सुस्वप्नमुपजायते ॥१७॥ बालग्रहा
भिभूतानां बालानां शांतिकारकं ॥ संघातभेदे
च नृणां मैत्रीकरणमुत्तमं ॥१८॥ दुर्वृत्तानामशेषा

णां बल हानिकरं परं ॥ रक्षोभूतपिशाचानां
पठनादेव नाशनं ॥१९॥ सर्वं ममैतन्माहा
त्म्यं मम संनिधिकारकं ॥ पशुपुष्पार्घधूपै
७८ श्च गंधदीपैस्तथोत्तमैः ॥२०॥ विप्राणां भो
जनैर्होमैः प्रोक्षणीयैरहर्निशं ॥ अन्यैश्च
विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥२१॥

प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रु
ते ॥ श्रुतं हरति पापानि तथारोग्यं प्रयच्छ
ति ॥२२॥ रक्षां करोति भूतेभ्यो जन्मनां
कीर्तनं मम ॥ युद्धेषु चरितं यन्मे दुष्टदैत्य
निबर्हणं ॥२३॥ तस्मिञ्छ्रुते वैरिकृतं भयं

स॰ मृ॰

पुंसां न जायते॥ युष्माभिः स्तुतयो याश्च

याश्च ब्रह्मर्षिभिः कृताः॥२३॥ ब्रह्मणा च

७८ कृता यास्ताः प्रयच्छंति शुभां मतिं॥ अ ७८

रण्ये प्रांतरे वापि दावाग्नि परिवारितः॥

२४॥ छ छ छ छ छ छ छ छ छ छ

जायते॥ युष्माभिस्स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः

॥२३॥ ब्रह्मणा च कृता यास्ताः प्रयच्छंति शुभां मतिं॥ अर

ण्ये प्रांतरे वापि यद्वाग्नि परिवारितः॥२४॥ दस्युभिर्वावृतः

शून्ये गृहीतो वापि शत्रुभिः॥ सिंहव्याघ्रानुयातो वा वने वा

वनहस्तिभिः॥२५॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतो

पि वा॥ आघूर्णितो वा वाते न स्थितः पोते महार्णवे॥२६॥

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे॥ सर्व बाधासु

स॰ती
७९

घोरासुवेदनाभ्यर्दितोपिवा॥२७॥स्मरन्ममैतच्चरितंनरो
मुच्येतसंकटात॥ममप्रभावात्सिंहाद्यादस्यवोवैरिण
स्तथा॥२८॥दूरादेवपलायंतेस्मरतश्चरितंमम॥ ॥ऋ
षिरुवाच॥ ॥इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा॥
२९॥पश्यतामेवदेवानांतत्रैवांतरधीयत॥तेपिदेवानि राम॰
रातंकाः स्वाधिकारान्यथापुरा॥३०॥यज्ञभागभुजःसर्वे ७९
चक्रुर्विनिहतारयः॥दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयु

धि॥३१॥जगद्विध्वंसिकेतस्मिन्महोग्रेतुल्यविक्रमे॥निशुं
भेचमहावीर्येशेषाःपातालमाययुः॥३२॥एवंभगवती
देवीसानित्यापिपुनःपुनः॥संभूयकुरुतेभूपजगतःप
रिपालनं॥३३॥तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते॥
सायाचिताचविज्ञानंतुष्टाऋद्धिंप्रयच्छति॥३४॥व्याप्तं
तयैतत्सकलंब्रह्मांडंमनुजेश्वर॥महाकाल्यामहाका
लेमहामारीस्वरूपया॥३५॥सैवकालेमहामारीसैवसृ

स॰ती ८० द्भिर्भवत्यजा॥ स्थितिं करोति भूतानां सैव काले सनातनी॥
३६॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे॥ सैवाभा
वे तथा तस्माद्विनाशायोपजायते॥ ३७॥ स्तुता संपूजिता
पुष्पैर्धूपगंधादिभिस्तथा॥ ददाति वित्तं पुत्रांश्च मतिं ध
र्मे तथा शुभां॥ ३८॥ ॥ इति मार्कंडेयपुराणे देवीमाहात्म्ये रामः ८०
नामः॥ ॥१२॥ ॥ऋषिरुवाच॥ ॥एतत्ते कथितं भूप दे
वीमाहात्म्यमुत्तमं॥ एवंप्रभावा सा देवी ययेदं धार्यते जगत्॥

॥१॥ विद्या तथैव क्रियते भगवद्विष्णुमायया॥ तया त्वमेष वै
श्यश्च तथैवान्ये विवेकिनः॥ २॥ मोह्यंते मोहिताश्चैव मो
हमेष्यंति चापरे॥ तामुपैहि महाराज शरणं परमेश्वरीं॥
३॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा॥ ॥ मार्कंडे
य उवाच॥ ॥इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ४॥
प्रणिपत्य महाभागं तमृषिं शंसितव्रतं॥ निर्विण्णोतिम
मत्वेन राज्यापहरणेन च॥ ५॥ जगाम सद्यस्तपसे स च वै

स॰ती श्योमहामुने॥ संदर्शनार्थमंबाया नदीपुलिन संस्थितः ६॥
८१ सचवैश्यस्तपस्तेपे देवीसूक्तं परंजपन्॥ तौतस्मिन्पुलिने दे
व्याः कृत्वामूर्त्तिंमहीमयीं॥ ७॥ अर्हणांचक्रतुस्तस्याःपुष्पधू
पाग्नितर्पणैः॥ निराहारौ यतात्मानौ तन्मनस्कौ समाहितौ ८॥ राम॰
ददतुस्तौ बलिंचैवनिजगात्रासृगुक्षितं॥ एवंसमारा ८१
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः॥ ९॥ परितुष्टाजगद्धात्रीप्र
त्यक्षंप्राहचंडिका॥ ॥देव्युवाच॥ ॥यत्प्रार्थ्यतेत्वयाभू

पत्वयाचकुलनंदन॥ १०॥ मत्तस्तत्प्राप्यतांसर्वंपरितु
ष्टाददामितत्॥ ॥मार्कंडेयउवाच॥ ॥ततोवव्रेनृपो
राज्यमविभ्रंश्यन्यजन्मनि॥ ११॥ अत्रैवचनिजंराज्यं
हतशत्रुबलंबलात्॥ सोपिवैश्यस्ततोज्ञानंवव्रेनिर्विण्ण
मानसः॥ १२॥ ममेत्यहमितिप्राज्ञः संगविच्युतिकारकं॥
॥ ॥देव्युवाच॥ ॥स्वल्पैरहोभिर्नृपतेस्वराज्यंप्राप्स्यतेभ
वान्॥ १३॥ हत्वारिपून्स्खलितंतवतत्रभविष्यति॥ मृत

स०ती ८२ श्वन्ययःसंप्राप्यजन्मदेवाद्विवस्वतः॥२४॥सावर्णिको
नाममनुर्भवान्भुविभविष्यति॥वैश्यवर्यत्वयायश्च
वरोस्मत्तोभिवांछितः॥२५॥तंप्रयच्छामिसंसिध्यैतव
ज्ञानंभविष्यति॥ ॥मार्कंडेयउवाच॥ ॥इतिदत्वातं
योर्देवीयथाभिलषितंवरं॥२६॥बभूवांतर्हितासद्यो राम० ८२
भक्त्याताभ्यामभिष्टुता॥एवंदेव्यावरंलब्ध्वासुरथः
क्षत्रियर्षभः॥२७॥सूर्याज्जन्मसमासाद्यसावर्णिर्भ

वितामनुः॥२८॥ ॥इतिमार्कंडेयपुराणेसावर्णि
केमन्वंतरेदेवीश्रीभगवतीमाहात्म्येसुरथवैश्ययो
र्वरप्रदानंनामत्रयोदशोऽध्यायः॥ १३॥
श्रीजगदंबार्पणमस्तु॥ ॥श्रीरस्तुसर्वजगतः॥ ॥
सावर्णिःसूर्यतनयोसावर्णिर्भवितामनुरित्यंत
त्रयोदशाध्यायस्तोत्रं॥जपहोमरित्थंकृतेनतर

स०ती
८२
विछल

पूर्वंत्रयोद



शाध्यायः॥१३॥

पोच्छस्पदं
रामः
८२

॥ ॥राजोवाच॥ ॥भगवन्नवतारामेचंडिकायास्त्वयोदि
ताः॥एतेषांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्हसि॥१॥आराध्यं
यन्मयादेव्याःस्वरूपंयेनतद्द्विज॥विधिनाब्रूहिसकलं
यथावत्प्रणतस्यमे॥२॥ ॥ऋषिरुवाच॥ ॥इदंरहस्यं
परममनाख्येयंप्रचक्षते॥भक्तोसीतिनमेकिंचित्तवा
वाच्यंनराधिप॥३॥सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापर
मेश्वरी॥लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थिता॥४॥

मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती॥नागंलिंगंचयो
निंचबिभ्रतीन्टपमूर्धनि॥५॥तप्तकांचनवर्णाभातप्त
कांचनभूषणा॥शून्यंतदखिलंस्वेनपूरयामासतेज
सा॥६॥शून्यंतदखिलंलोकंविलोक्यपरमेश्वरी॥ब
भाररूपमपरंतमसाकेवलेनहि॥७॥साभिन्नांजनसं
काशादंष्ट्रांचितवरानना॥विशाललोचनानारीबभ्र
वतनुमध्यमा॥८॥खड्गपात्रशिरःखेटैरलंकृतचतु

राम॰
८४

र्भुजा॥कबंधहारंशिरसाबिभ्राणाहिशिरःस्रजं॥९॥सा
प्रोवाचमहालक्ष्मीतामसीप्रमदोत्तमा॥नामकर्मचमे
मातर्देहितुभ्यंनमोनमः॥१०॥तांप्रोवाचमहालक्ष्मीस्ता
मसींप्रमदोत्तमां॥ददामितवनामानियानिकर्माणितानि
ते॥११॥महामायामहाकालीमहामारीक्षुधातृषा॥नि
द्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया॥१२॥इमानितव
नामानिप्रतिपाद्यानिकर्मभिः॥एभिःकर्माणितेज्ञात्वायो

धीनेसोभुवतेसुखं॥१३॥तामित्युक्त्वामहालक्ष्मीः स्वरू
पमपरंनृप॥सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ॥१४॥
अक्षमालांकुशधरावीणापुस्तकधारिणी॥साबभूव
वरानारीनामान्यस्यैचसाददौ॥१५॥महाविद्यामहावा
णीभारतीवाक्सरस्वती॥आर्याब्राह्मीकामधेनुर्वेदगर्भा
चधीश्वरी॥१६॥अथोवाचमहालक्ष्मीर्महाकालींसर
स्वतीं॥युवांजनयतांदेव्यौमिथुनेस्वानुरूपतः॥१७॥इ

रा० ८९

त्युक्त्वासामहालक्ष्मीः ससर्जमिथुनंस्वयं॥हिरण्यग
र्भौरुचिरौस्त्रीपुंसौकमलासनौ॥१८॥ब्रह्मन्विधेविरिं
चेतिधातरित्याहतंनरं॥श्रीः पद्मेकमलेलक्ष्मीत्याहमा
तास्त्रियंचतां॥१९॥महाकालीभारतीचमिथुनेसृज
तः सह॥एतयोरपिरूपाणिनामानिचवदामिते॥२०॥
नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरं॥जनयामास
पुरुषंमहाकालीसितांस्त्रियं॥२१॥सरुद्रः शंकरः स्था

पुः कपर्दी च त्रिलोचनः ॥ त्रयी विद्या कामधेनुः सा स्त्री
भाषाक्षरा स्वरा ॥ २२ ॥ सरस्वतीं स्त्रियं गौरीं कृष्णं च पुरु
षं च परंतप ॥ जनयामास नामानि तयोरपि वदामि ते ॥ २३ ॥
विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी
सती चंडी सुंदरी सुभगा शुभा ॥ २४ ॥ एवं युवतयः सद्यः रामः
पुरुषत्वं प्रपेदिरे ॥ चक्षुष्मंतो नु पश्यंति नेतरे तद्विदो ८६
बुधाः ॥ २५ ॥ ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीं ॥

रुद्राय गौरीं वरदां वासुदेवाय च श्रियं ॥ २६ ॥ स्वरया स
ह संभूय विरिंचोंडमजीजनत् ॥ बिभेद भगवान् रुद्रस्त
द्गौर्या सह वीर्यवान् ॥ २७ ॥ अंडमध्ये प्रधानादि कार्यजा
तमभून्नृप ॥ महाभूतात्मकं सर्वं जगत्स्थावरजंगमं २८
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥ महालक्ष्मी
र्महाराज सर्वदेवमयीश्वरी ॥ २९ ॥ निराकारा च साकारा सैव
नानाभिधानभृत् ॥ नामांतरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥

॥२०॥ ॥इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येप्राधानिकरहस्यंनामअध्यायः १४ ऋषिरुवाच॥ ॥त्रिगुणातामसीदेवीसात्विकीयात्रिधोदिता॥ साशर्वाचंडिकादुर्गाभद्राभगवतीर्यते॥१॥ योगनिद्राहरेरुक्तामहाकालीतमोगुणा॥ मधुकैटभनाशार्थंयांतुष्टावांबुजासनः॥२॥ दशवक्त्रादशभुजादशपादांजनप्रभा॥ विशालयाराजमानात्रिंशल्लोचन

रामः ८७

मालया॥३॥ स्फुरद्दशनदंष्ट्रासाभीमरूपापिभूमिप॥ रूपसौभाग्यकांतीनांसंप्रतिष्ठामहाश्रियां॥४॥ खड्गबाणगदाशूलचक्रपाशान्शंडिभृत॥ परिघंकार्मुकंशीर्षंनिश्चोतद्रुधिरंदधौ॥५॥ एषासावैष्णवीमायामहाकालीदुरत्यया॥ आराधितावशीकुर्यात्पूजाकर्तुश्चराचरं॥६॥ सर्वदेवशरीरेभ्योयाविर्भूतामितप्रभा॥ त्रिगुणासामहालक्ष्मीःसाक्षान्महिषमर्द्दिनी॥७

श्वेताननानीलभुजासुश्वेतस्तनमंडला॥रक्तमध्यार
क्तपादानीलजंघोरुरुन्मदा॥८॥सुवृत्तजघनाचित्र
माल्यांबरविभूषणा॥चित्रानुलेपनाकांतिरूपसौभा
ग्यशालिनी॥९॥अष्टादशभुजाहृद्यासासहस्रभु
जासती॥आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात रा॰मः
॥१०॥अक्षमालांचकमलंबाणोसिःकुलिशंगदा॥च ८८
क्रंत्रिशूलंपरशुःशंखोघंटाचपाशकः॥११॥शक्तिर्दंड

श्चर्मचापंपानपात्रंकमंडलुः॥अलंकृतभुजामेभिरा
युधैःकमलासना॥१२॥सर्वदेवमयीमीशांमहालक्ष्मी
मिमांनृप॥पूजयेत्सर्वलोकानांसदेवानांप्रभुर्भवेत॥
१३॥गौरीदेहात्समुद्भूतायासत्वैकगुणाश्रया॥साक्षा
त्सरस्वतीप्रोक्ताशुंभासुरनिबर्हिणी॥१४॥दधौचाष्टभु
जाबाणमुसलेशूलचक्रभृत॥शंखंघंटांलांगलंचका
र्मुकंवसुधाधिप॥१५॥एषासंपूजितानत्यासर्वज्ञत्वं

प्रयच्छति ॥ निशुंभमथनी देवी शुंभासुरनिबर्हिणी ॥ ६
इत्युक्तानि स्वरूपाणि मूर्त्तीनां तव पार्थिव ॥ उपासनं
जगन्मातुः पृथगासां निशामय ॥ ७ ॥ महालक्ष्मीर्यदा
पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठ
तो मिथुनत्रयं ॥ ८ ॥ विरिंचिः स्वरया मध्ये रुद्रो गौर्या रा.म.
च दक्षिणे ॥ वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयं ॥ ८९
९ ॥ अष्टादशभुजा मध्ये वामे चास्या दशानना ॥ दक्षि

णेष्टभुजा लक्ष्मीर्महतीति समर्चयेत ॥ १० ॥ सर्वाद्विदलतः
पूज्याः सितांगाद्याश्च भैरवाः ॥ अष्टादशभुजा चैषा य
दा पूज्या नराधिप ॥ ११ ॥ दशानना चाष्टभुजा दक्षिणोत्त
रयोस्तदा ॥ कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशांतये १२
यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी ॥ नवास्याः श
क्तयः पूज्यास्तदा रुद्रविनायकौ ॥ १३ ॥ नमो देव्या इति स्तो
त्रैर्महालक्ष्मीं समर्चयेत ॥ अवतारत्रयार्चायां स्तोत्रमंत्रा

स्तदाश्रयां॥२४॥अष्टादशभुजाचैषाह्यामहिषम
र्दिनी॥महालक्ष्मीर्महाकालीसैवप्रोक्तासरस्वती॥२५॥
ईश्वरीपुण्यपापानांसर्वलोकमहेश्वरी॥महिषांतक
रीयेनपूजितासजगत्प्रभुः॥२६॥पूजयेज्जगतांधात्री ए.म.
चंडिकांभक्तवत्सलां॥अर्घ्यादिभिरलंकारैर्गंधपु २०
ष्पैस्तथाक्षतैः॥२७॥धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यस
मन्वितैः॥रुधिराक्तेनबलिनामांसेनसुरयानृप॥२८

प्रणामाचमनीयेनचंदनेनसुगंधिना॥सकर्पूरैश्चतां
बूलैर्भक्तिभावसमन्वितैः॥२९॥वाममस्याग्रतोदेव्या
श्छिन्नशीर्षंमहासुरं॥पूजयेन्महिषंयेनप्राप्तंसायु
ज्यमीशया॥३०॥दक्षिणेपुरतःसिंहंसमग्रंधर्ममीश्व
रं॥वाहनंपूजयेद्देव्याधृतंयेनचराचरं॥३१॥ततःकृ
तांजलिर्भूत्वास्तुवीतचरितैरिमैः॥कुर्यात्तुस्मयतोवी
मांस्तस्यामेकाग्रमानसः॥३२॥एकेनवामध्यमेन

नैवेनैवरयेरिह ॥ चरितार्द्धं तु न जपेज्जपंश्छिद्रमवाप्नुयात
॥ ३३ ॥ स्तोत्रमंत्रैः स्तुवीतेमां यदि वा जगदंबिकां ॥ प्रद
क्षिणानमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३४ ॥ क्षमाप
येज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकं च जुहुया
त्पायसं तिलसर्पिषा ॥ ३५ ॥ जुहुयात्स्तोत्रमंत्रैर्वा चंडि रा.म.: २१
कायै शुभं हविः ॥ भूयो नामपदैर्देवीं पूजयेत्सुसमा
हितः ॥ ३६ ॥ प्रयतः प्रांजलिर्भूत्वा प्रणम्यारोप्य चात्मनि ॥

सुचिरं भावयेदीशां चंडिकां तन्मयो भवेत् ॥ ३७ ॥ एवं
देवी यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीं ॥ भुक्त्वा भोगान्य
थाकामं देवीसायुज्यमाप्नुयात् ॥ ३८ ॥ यो न पूजयते
नित्यं चंडिकां भक्तवत्सलां ॥ भस्मीकृत्यास्य पुण्यानि
निर्दहेत्परमेश्वरी ॥ ३९ ॥ तस्मात्पूजय भूपाल सर्वलो
कमहेश्वरीं ॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्य
सि ॥ ४० ॥ ॥ इति मार्कंडेयपुराणे वैकृतिरहस्यं नाम ॥

॥ ॥ऋषिरुवाच॥ ॥नंदाभगवतीनामयाभविष्यतिनं
दजा॥स्तुतासंपूजिताभक्त्यावशीकुर्याज्जगत्त्रयं १
कनकोत्तमकांतिः सासुकांतिकनकांबरा॥देवीकन
कवर्णाभाकनकोत्तमभूषणा॥२॥कमलांकुशपाशा
ब्जैरलंकृतचतुर्भुजा॥इंदिराकमलालक्ष्मीःसाश्री रामः
रुक्मांबुजासना॥३॥यारक्तदंतिकानामदेवीप्रोक्ता २२
मयानघ॥तस्याःस्वरूपंवक्ष्यामिशृणुसर्वभयापहं॥४॥

रक्तांबरारक्त॥वर्णारक्तसर्वांगभूषणा॥रक्तायुधार
क्तनेत्रारक्तकेशातिभीषणा॥५॥रक्ततीक्ष्णनखारक्त
दशनारक्तदंतिका॥पतिंनारीवानुरक्तादेवीभक्तंभजे
ज्जनं॥६॥वसुधेवविशालासासुमेरुयुगलस्तनी॥
दीर्घौलंबावतिस्थूलौतावतीवमनोहरौ॥७॥कर्कशा
वतिकांतौतौसर्वानंदपयोनिधी॥भक्तान्संपाददेद्देवि य
सर्वकामदुघौस्तनौ॥८॥खड्गंपात्रंचमुसलंलांगलंच


बिभर्त्तिसा॥आख्यातारक्तचामुंडादेवीयोगेश्वरीतिच
॥९॥अनयाव्याप्तमखिलंजगत्स्थावरजंगमं॥इमां
यःपूजयेद्भक्त्यासव्याप्नोतिचराचरं॥१०॥अधीतेय
इमांनित्यंरक्तदंत्यावपुस्तवं॥तंसापरिचरेद्देवीपतिं
प्रियमिवांगना॥११॥शाकंबरीनीलवर्णानीलोत्पल
विलोचना॥गंभीरनाभिस्त्रिवलीविभूषिततनूदरी॥
१२॥सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी॥मुष्टिंशिली

रग्न: २३

मुखापूर्णकमलंकमलालया॥१३॥पुष्पपल्लवमूलादि
फलाढ्यंशाकसंचयं॥काम्यानंतरसैर्युक्तंक्षुत्तृण्मृत्यु
जरापहं॥१४॥कार्मुकंचस्फुरत्कांतिबिभर्त्तिपरमेश्वरी॥
शाकंभरीशताक्षीसासैवदुर्गाप्रकीर्त्तिता॥१५॥उमागौरी
सतीचंडीकालिकेसाचपार्वती॥शाकंभरींस्तुवन्ध्यायन्
जपन्संपूजयन्नमन्॥१६॥अक्षय्यमश्नुतेशीघ्रम
न्नपानामृतंफलं॥भीमापिनीलवर्णासादंष्ट्रादशन

भास्करा॥ १७॥ विचित्रालंकृतोत्तुंगनानारीरत्नतुंगपयोधरा॥
चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती॥ १८॥ एकवीरा का
लरात्रिः सैवोक्ता कामदा स्तुता॥ तेजोमंडलदुर्द्धर्षा भ्रा
मरी चित्रकांतिभृत॥ १९॥ चित्रभ्रमरपाणिः सा महामा
रीति गीयते॥ इत्येता मूर्त्तयो देव्या याः ख्याता वसुधाधिप
॥ २०॥ जगन्मातुश्चंडिकायाः कीर्त्तिताः कामधेनवः॥
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया॥ २१॥ व्याख्यानं

दिव्यमूर्त्तीनामधिष्ठाय वदितः स्वयं॥ तस्मात्सर्वप्रयत्नेन
सर्वकामफलप्रदं॥ २२॥ ॥ इति मार्कंडेयपुराणे सावर्णि
कि मन्वंतरे देवी भगवतीमाहात्म्ये मूर्त्तिरहस्यं नामा
ध्यायः १६॥ ॥ श्रीजगदंबार्पणमस्तु॥ ॥ छ्रु छ्रु
६५ शके १६८६ क्रोधीनामसंवत्सरे भाद्रपद शुक्ल एकादश्यां इदं
पुस्तकं समाप्तं॥ ॥ लेखकपाठकयोः शुभं भवतु॥ ॥
छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु छ्रु


श्रीरस्तु॥

[OrderDescription]
,CREATED=09.09.19 11:18
,TRANSFERRED=2019/09/09 at 11:44:08
,PAGES=98
,TYPE=STD
,NAME=S0001675
,Book Name=M-457-SAHSHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,